N.A.
Nirnayakand
निर्णयकाण्ड
Sanskrit
Paper - Handwritten
N.A. (very old)
35 Folio
10.8" X 4.7"
Incomplete

ॐ श्रीगणेशाय नमः ॥ अथ तिर्यक्काण्डं चतुर्थमारभ्यते ॥ तत्र पृथिव्यप्तेजोवायुवनस्पतिभेदेनैकेन्द्रियाः स्था
वराद्वित्रिचतुःपंचेंद्रियभेदेन त्रसाः क्रमिपशुमनुष्यास्तिर्यंचो वक्ष्यन्ते ॥ तत्र पृथिवीकायिकानाह ॥ भवन्त्यस्यां
सर्वे ॥ भूः ॥ स्यादिभ्यो वेति क्विप् ॥ कृभूभ्यामिति किति मिप्रत्यये॰ भूमिः ॥ प्रथते॰ पृथिवी ॥ प्रथेरिवट् पृथश्चेति साधुः ॥
पृथ्वी ॥ पृथुत्वात्॰ स्वरादुतइति ङी ॥ वसु धनं धत्ते॰ वसुधा ॥ आतोऽड इति डः ॥ उर्वी॰ विस्तीर्णत्वात् ॥ वसूनि धारयति॰

भूमेस्त्रिचत्वारिंशत् १

भूर्भूमिः पृथिवी पृथ्वी वसुधोर्वी वसुन्धरा ॥ धात्री धरित्री धरणी विश्वा विश्वम्भ
रा धरा ॥१॥

वसुन्धरा ॥ धारेर्दृंवैति खः ॥ दधाति विश्वं ॥ धात्री ॥ धरति॰ धरित्री ॥ वन्धिवहीत्यादि स्महरणादित्रः ॥ अरहम्स इत्यरो
धरणिः ॥ ज्यास॰ धरणी विशन्ति सर्वे मस्याम॰ विश्वा ॥ निघ्नी निकि दृः विश्वं जगद्विभर्ति ॥ विश्वम्भरा ॥ भृद
जीति खः ॥ धरति॰ धरा ॥१॥



क्षियन्त्यधिवसन्त्येनाम्॥ क्षितिः॥ क्षि निवासगत्योः। क्षौतिभूषयन्। क्षोणिः॥ कालावीति णिः। ङ्याम्। क्षोणी। क्षमते भारम्। क्षमा। नास्त्यन्तोऽस्याः अनन्ता। जिनाति हीयते। ज्या। क्षचिर्हीत्तिङः॥ कायति भूषयम्। कुः। घञ्का हृषीति किदुः। वसूनि सन्त्यस्याम्। वसुमती। मह्यतेऽत्र। मही। गोत्र इल्लात डोः। गच्छन्त्यस्याम्। गौः। गां पृथ्वं धरत्वाद्धा। गोत्रा। शैलास्सन्त्यस्याम्। गोत्रा॥ अभ्रादित्वात्। गात्रापते वा॥ भूतानि दधाति धारयति॥ भूतधात्री॥ क्षमते भारम्॥ क्ष्मा॥ हृक्तरत्री ख्या ति मेनिपात्यते॥ गन्धस्य माता इव॥ गन्धमाता।

क्षितिः क्षोणी क्षमाऽनन्ता ज्या कुर्वसुमती मही। गौर्गोत्रा भूतधात्री क्ष्मा गन्धमाताऽचलाऽवनिः॥२॥

सर्वंसहा रत्नगर्भा जगती मेदिनी रसा॥ काश्यपी पर्वताधारा स्थिरेला रत्नबीजसूः॥३॥

भुवेणरथगुणम्नानात्॥ न चलत्यचला॥ अवति प्रजाः अव्यते भूपैरिति वा। अवनिः सर्हरतीत्यनिः॥२॥ सर्वं सहते। सर्वंसहा। सर्वोत्सहते त्वेष्ठीति खः॥ रत्नानि गर्भेऽस्याः रत्नगर्भा। रत्नवतीति भागुरिः॥ गच्छन्त्यस्याम्। जगती॥ गमेर्द्वे चेति कत्तः॥ अश्वत्थादित्वत् ङीः मेदस्त्यवस्याम्। मेदिनी। हैत्यमेदोयोगादित्यन्ये। रस्यते रसास्सन्त्यस्यां वा। अभ्रादित्वात्॥ कश्यपस्येयम्। काश्यपी। भार्गवेण हि पृथ्वी जित्वा ह्यस्मै दत्ता॥ पर्वता अस्या धारोऽस्याः॥ पर्वताधारा। स्थिरा। अचलत्वात्। इलति। इला। नाम्युपान्त्येति कः॥ रत्नप्रसवस्थानत्वं वा। रत्नानि



हे०री०

२

विपुला । विशालत्वात् ॥ सागरशब्दादर्धे नेमी मेखलाम्बरां ॥ सागरो नेमिर्मेखलाम्बरं यस्याः सागरनेमी । सागरमेखला । सागराम्बरा । योगिक त्वात् ॥ समुद्ररशना । समुद्रकाञ्चिः । समुद्रवसना ॥ इत्याद्यपि । शेषश्चात्र । अथ पृथ्वी महाकान्ता क्षान्ता मेदस्विनी क्षिति । गोत्रकीलाधन श्रेणी मध्यलोका जगद्वहा देहिनी कुम्भिनी मोदिमेदा स्थावरस्थली ॥ द्यौश्च पृथिवी च द्यावापृथिव्यौ । एवं द्यावाभूमी । द्यावाक्षमे । दिवोद्यावेति द्यावादेशः ॥ दिवसः दिवः पृथिव्यां वेति दिवसादेशे ॥ दिवस्पृथिव्यौ । दिवः पृथिव्या वित्यपि रूढन्त्यनयोः

४३ स्वर्भूम्योः सप्त

विपुला सागरशब्दात्परे स्युर्नेमी मेखलाम्बराः ॥ द्यावापृथिव्यौ तु द्यावाभूमी द्यावाक्षमे अपि ॥ ४ ॥

दिवस्पृथिव्यौ रोदस्यौ रोदसी रोदसी च ते ॥ उर्वरा सर्वसस्याढ्या भूमिः उर्वरा सर्वसस्या भूरीरिणं पुनरूषरं ॥२ ॥ ५ ॥ १ ॥

द्वे सर्वसस्याढ्यभूमेः द्वे ऊषरभूमेः

रोदस्यौ स्त्रीलिङ्गं द्विवचनान्तः । असियस्माभौतरा इत्वानत्री । रोदसी नपुंसकलिङ्गो द्विवचनान्तः । स्वच्छन्द्येमुभयोनिर्देशः । रोदन्तौ रोदसी समासे द्विवचने ॥ रोदसी । यत्तु स्वर्लः द्यावापृथिव्यौ द्विवचने रोदसी शब्द स्त्रीलिङ्गोप्यस्ति । रोदसी त्वपि

उर्वी हिंसायां मोव ऊर्वति । तुधमुर्वरा उरब्ध्वे निपात्यते । ऊरूरूदयति वा । सर्वं सस्यमस्याः सर्वसस्या भूमिः ऋ गती इरिणम् । ऋ च्छन्ते । उच्चेः कारिणे दूरं तुः । क्रिहितो न ऊषस्यान् वासऊषाम । रोः इत्यादि रीति दातु पृथ्वी कोरः ॥ ऊधाः स्यात्स्तीतिवा ॥ मध्याद्वित्वात्तरः ॥ ५ ॥ लारस्य दः ॥ २

रोदसी चं ते इति ॥ नभूद्यावौ समुदिते रोदसी त्येकवचनान्तेन शब्देनोच्यते यद्वा रोदः शब्देन सान्तेन नपुंसकलिङ्गेन ते द्वे पृथगुच्येते ॥ तथा चाजयः रोदसी रोदसा सा द्वे पृथ्वी स्वर्गौ विवक्षिना दिति ॥ २

स्थलस्याने१

स्थलीन। स्थलम्। तिष्ठन्त्यस्मिन्निति वा स्थायो वेतिकिह ल: स्थली स्वकृत्रिमा वेन् भाजगोरोतितिङी। कृत्रिमा तु स्थला। स्थलार्थमुभय
लिङ्ग: निर्देश: ॥०॥ मरुपन्तेतथा: त्रमरु: धुवुगतो। धन्वाति धन्वा। उह्नित ह्रीस्वन्। धनतीति वा। मन्वन्निति वन। पुल्लिङ्गोवेतो ॥०॥
नमहरत्यनेस्स स्वमहतम्। हसा हि मिरन्का ष्ठ स्तेचकेहारगिहा। खलन्त्यचम्। वकाद्या: रिवलम्। एषोहराहि त्वाहित्वम्।०। मद्युने
मना। सुधाहित्वा। न्कप। मरेइवमरान्तिका। मरुद्दिकशातस्वाचेतिक: ॥ सामन्तिकाहारा। ऊपतिरुजन्यूष:।०। सामन्तिकास्तु

स्थलं[1] स्थली[2] मरुर्[1] धन्वा[7] स्रिइत्राद्यं[5] महत्तं[1] खिलं[12] ॥ मरुस्तन्तिका सा स्ताऐषां मन्स्तां मन्तांचं सामुभा ॥६॥
हमाल्लवणरत्नानिस्स्यात्सामुद्रं लवणं स्थम्। तहस्रीवंवशिरस्पृसैन्धवन्तुनहीभवं ॥ ७ ॥

भाग्यमास्ता। मरेइवन्सामन्त्न्। सहितापुगास्त इसाधू ०॥६॥ हवंयस्याहमा विलिभिलीतिकिनम: लवणास्य रवानिराकरे लव
णा त्वानि:।०। पहुवणं समुद्रेभवंतत्सामुद्रं। लुनातिस्वस्यानं लवणम्। स्व ह्रोणा निमाप्नोत्य ह्रीवम्। म ह्राहुत्तिवेनिपा
त्येत। उत्पन्ने वषिा: ॥ पुल्लिङ्ग: स्त्रीवोप मिनिकाचत। स्याविरेतीरेनिपात्येत ० सिन्धुनद्युपलह्नितेदेशेभवं सैन्धवम्। पुल्लि
ङ्ग: ॥ नद्यांभवतिनहीभवम् ॥ ७ ॥

चत्वारि सिन्धुदेशे
द्भवलवणस्य॥१

लवणोदक
समुद्रजलो
द्भवलवण
स्य॥२

हिं॰टी
२

मिरै
मरिचं मंथ्येभवं मारिचं मंथ्यं॥ मारिचवन्धं मारिचमन्तं वा कुः॥ शीतं शिनोति उष्णवीर्यत्वात् शीतशिवम्॥ प्रहूं हूर्त्तिं वेनिपात्यते॰
रूमायामाकरे भवं॥ प्राग्घितीयेऽणि स्वार्थे के च॥ रोमकम्॥ वसति वस्तु वस्त्वेव वस्तुकम्॥ यन्माल॥ रोमके वस्तुकं वस्तु वस्तुधं
धिवस्तकं नाम लवणम्॥ विल्लाति भिनत्ति मलान्॥ विडं पाके साधु पाक्यं कच्चराख्यं प च्यन इति वा॥ कृत्रिमं॰ कृतक
इत्यर्थः॥ पाक्यविडलवणयोर्भेदपि कृतकत्वादेकम्॥ ६॥ सुवर्चलाकरे भवं सौवर्चलं तत्॥ पुंक्लीबलिङ्गः॥ सुष्ठुवर्चते

मारिचमन्थ्यं शीतशिवं रोमकं त्वनुरूमाभवं॥ वस्तुकं वस्तकं तत्स्याद्विडं पाक्यं तु कृत्रिमं॥ ६॥ सौ
वर्च्चलेऽक्षं रुच्यकं दुर्गन्धं शूलनाशनं॥ कृष्णं तु तत्र तिलकं यवक्षारो यवाग्रजः॥ ७॥

सुवर्चेस्तस्येदं सौवर्चमग्निदीपनं॥ तज्ज्ञातीतिवा॥ अक्षं हन्ति व्याप्नोति॥ अक्षं॥ रोचतेऽन्नमनेन रुच्यकं॥ घुघूंदीनि किद
कः॥ दुष्टो गन्धोस्य दुर्गन्धं॥ शूलं रोगं नाशयति शूलनाशनम्॥ ०॥ तत्र सौवर्चले कृष्णे॥ तिलति स्निह्यति ति
लकम्॥ पुंक्लीबलिङ्गः॥ घुघूंदीनि किद्कः॥ पूर्वेन्तु सघुवर्णसगन्धं कृष्णलवणं तिलकमित्येके॥ यद्वृद्धाः॰ कृष्णे
सौवर्चले गुणाः लवणं गन्धवर्जितं इति॥ यवानां क्षारो यवक्षारः॥ यवाग्रेभ्यो जातो यवाग्रजः॥ हस्त्वा यवांकुरे
जायत इत्यर्थः॥ ८॥

शिवो
२

पवनालेभ्योजातोयवनालजः ॥ पच्यतेपाक्यः ॥ अप्रसौवनस्यतिकायजनितोपिक्षारप्रस्तावात्पृथ्वीकायेभणितः स्वंस्वर्जि
काक्षाराद्यवप्यूह्यम् ॰ ॥ पाचयतिपाचनः ॥ केपाचनकः ॥ टंकयतिलोहंटंकणः ॥ विक्करणोन्यपरोणनिपात्यते ॰ टंकनोपि
मालत्यास्तीरेजातोमालतीनीरजः ॥ लोहंहेमादिश्लेषयत्यनेनलोहश्लेषणः ॥ रसंशोधयतिरसशोधनः ॥ १० ॥

पवनालजःपाक्यंश्चंपाचनकंस्तुटंकणः ॥ मालतीनीरजोलोहश्लेषणोरसशो
धनः ॥ १० ॥ समौस्तुस्वर्जिकाक्षारंकापोतसुखवर्च्चकौ ॥ स्वर्जिस्तुस्वर्जिकासुघ्नी
योगवाहीसुवर्चिका ॥ ११ ॥

स्वर्जिकांरव्याक्षाप्येतेस्वर्जिकाक्षारः ॥ कपोतस्यायंकापोतः ॰ कपोतवर्णत्वात् ॥ ईषन्मूयते वादृश्योमतितिनः ॥ सुखायच
र्चतेसुखवर्चकः ॰ ॥ सृज्यतेस्वर्जिः ॥ स्त्रीलिङ्गः ॥ स्वरेभ्यइः ॥ के ॰ स्वर्जिका ॥ सुघ्नंघ्नन्तिसुघ्नी ॥ ख्यचिह्नेतट
क ॥ योगंवहति योगवाही ॥ सुष्ठुवर्चतेसुवर्चिका ॥ ॰ ॥ ११ ॥

विभ्रति धर्मेम्म भरतानि पञ्चतत्रैकं जम्बूद्वीपे द्वे धातकीषण्डे द्वे च पुष्करवरद्वीपार्द्धे इति एवं भरतस्यान
क्रमेणऐरावतीनां नदीनां निवासाः ऐरावतान्यपि पंच॥ विदिहस्तेते विदेहाः पंचते च द्विविधाः पूर्वे चाऽप
रे च कुरून्विनेति देवकुरूनुत्तरकुरूंश्च वर्जयित्वान्यथेः॥ तेषां हि युगलधर्मोत्पत्तिहेतुत्वात्कर्मभूमित्वम्॥

कर्मभूमीनामेकैकम्

भरतान्यैरावतानि विदेहाश्च कुरून्विना॥ वर्षाणि कर्मभूम्यः स्युः शेषाणि
फलभूमयः॥१४॥

एकम्

वृष्यन्ते सिच्यन्ते वर्षाणि कर्मणां शुभाशुभानामुपार्जनभूमयः कर्मभूम्यः० शेषाणीति॥ हैमवत०
हरिवर्ष० रम्यक० हैरण्यवतानीति चत्वारि वर्षाणि जम्बूद्वीपे एतान्नामानि द्विगुणानि धातकीष
ण्डे पुष्करवरद्वीपार्द्धे च एवं चविंशतिर्वर्षाणि देवकुरूत्तरकुरुरूपविदेहांशद्वयसहितानि त्रिंशत्
फलभोगाय भूमयः फलभूमयः०॥१४॥

वृष्यंतेवर्षम्॥ पुंक्लीबलिङ्गः॥ वर्षधरा द्वयो हिमवन्महाहिवन्निषधनी लरुक्मिशिखरिणः षट् जम्बूद्वीपे
एतन्नामानो द्विगुणा धातकीखण्डे पुष्करवरद्वीपार्द्धे च॥ एवं त्रिंशन्नवर्षधराद्रयः॥ तैरंक्यंते चिह्न्यंते वर्षध
राद्रश्कुन्तम्॥ लौकिकानववर्षाण्याहुः॥ यथाभारतं प्रथमं ततः किंपुरुषंस्मृतम्० हरिवर्षं तथैवान्यन्मेरोर्द
क्षिणतो द्विज० रम्यकं चोत्तरं वर्षं तस्यैवानुहिरण्मयम्॥ उत्तराः कुरवश्चैव यथा वै भारतं तथा० भद्राश्वं पूर्वे

हेमवतादिवर्षस्य१ ऋषोदेशस्य

वर्षं वर्षधराद्यन्यं कैर्विषयः स्तूपवर्तनं॥ देशो जनपदो नीवृद्राष्ट्रं निर्गोऽथ मण्डलं॥१३॥०॥

तो मेरोः केतुमालं तु पश्चिमे॥ नवसाह्वमेकैकमेतेषां द्विजसत्तमः॥ इलावृतं च तन्मध्ये तन्मध्ये मेरुरु
च्छ्रितः॥०॥ विसिनोति विषयः॥ उपवर्त्तंतेऽस्मिन्नुपवर्तनम्॥ उपावर्त्तनमिति कान्यः॥ दिश्यते देशः
जनैः पद्यंते० ज नानां वा पदं जनपदः॥ नियतं वर्त्ततेऽस्यां नीवृत्॥ स्त्रीलिङ्गः॥ अमरस्तु पुंस्याह॥
राजंते राष्ट्रम्॥ पुंनपुंसकः॥ त्रिडिति त्रट्॥ निर्गम्यतेऽस्मिन्निर्जैः॥ निर्गो देशः इति साधुः॥ मण्डते मण्डलम्० त्रि
लिङ्गः॥ मर्दिकन्दीन्त्युलः॥ ऽप्यमरस्तु० नि
हतज्जनपदो देशविषयौ तूपवर्त्तनमितिप
वजाहा॥१३

आर्यो आवर्त्तन्तेऽत्र आर्यावर्त्तः॥ जिनाश्चावसर्पिण्यामृषभादयश्चतुर्विंशतिः॥ चक्रिणो भरताद्या द्वाद
श॥ अर्द्धचक्रिणोऽश्वग्रीवादयस्त्रिपृष्ठादयश्च नव॥ साहचर्यादय च [illegible] लाद्यो बलदेवा नव॥ ते
षां जन्मभूमिः पुण्यस्य भूः पुण्यभूः॥ आचारस्य वेदी च आचारवेदी॥ विन्ध्याद्रिहिमाद्र्योश्च मध्यभागः॥ य
द्याडिः॥ आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्॥ हिमवद्विन्ध्ययोर्मध्यमार्यावर्त्तं विदुर्बुधा इति॥ १ ४

आर्यावर्त्तो जन्मभूमिर्जिनचक्र्यर्द्धचक्रिणां॥ पुण्यभूराचारवेदी ४
मध्यं विन्ध्यहिमागयोः॥ १४॥ गङ्गायमुनयोर्मध्यमन्तर्वेदिः
समस्थली॥ ब्रह्मावर्त्तः सरस्वत्या दृषद्वत्याश्च मध्यतः॥ १५॥ ०

गङ्गाया यमुनायाश्च नद्योर्मध्यभूमिरन्तर्मध्ये वेदिरिवान्तर्वेदिः॥ समा चासौ स्थली च समस्थली॥
ब्रह्मणो ब्राह्मणा आवर्त्तन्तेऽत्र ब्रह्मावर्त्तः॥ ०॥ १५॥

श्रीगणेशाय नमः ॥ धर्मतीर्थकृतां वाचं नत्वा तत्त्वाभिधायिनीम् ॥ स्वोपज्ञनाममालाया विवृतिं विदधाम्यहम् ॥१॥ श्रेयोर्थमयमा
रम्भः किं तज्ञात्मविकत्थनैः ॥ परात्मनिन्दास्तोत्रे हि नाद्रियन्ते मनीषिणः ॥२॥ प्रामाण्यं वास्तु केर्थोऽडे व्युत्पत्तिर्द्धं नपा लनः ॥ प्रपं
चस्त्ववाचस्यतिप्रभ्मते रिहलक्ष्यताम् ॥३॥ प्रणिपत्यार्हत इति मंगलार्थम् मंगलं चाविघ्नेन शास्त्रस्य समाप्त्यर्थे ॥ सिद्धं प्रतिष्ठां
प्राप्तं सांगं शब्दानुशासनं यस्येति कर्तृविशेषणम् ॥ अंगानि लिंगधातुपारायणकादीनि एतावता च शब्दानुशासनेन सहास्या

प्रणिपत्यार्हतः सिद्धसांगशब्दानुशासनः ॥ रूढयौगिकमिश्राणां नाम्नां मालां तनोम्यहम् ॥ १ ॥०॥
एककर्तृकत्वमाह ॥ एककर्तृकत्वख्यापनं चान्योन्यसंवादात्प्रतीतिदार्ढ्योपदर्शनार्थं ॥ शब्दानुशासनस्य च कोशेनं तदधीनः स
र्वविद्यानां शकयेइति प्रदर्शनार्थं ॥ यदाह ॥ वक्तृत्वं च कवित्वं च विद्वत्तायाः फलं विदुः ॥ शब्दज्ञानादृते तन्न द्वयमप्युपपद्यते ॥ रूढादीनां ना
म्नां शब्दानां मालामभिधानचिन्तामणिनाम्नीं तनोम्यहमिति कर्तृनिर्देशः ॥१॥

तत्र रूढान् शब्दान् व्याचष्टे॥ व्युत्पत्तिरहिता इत्यादिना॥ प्रकृतिप्रत्ययविभागेनान्वयवर्जिता व्युत्पत्तिरहिताः शब्दा इत्यनुवाद्यनिर्देशः॥ रूढा इति विधेयपदम्॥ आखण्डलादय इत्युदाहरणम्॥ न ह्यत्र प्रकृतिप्रत्ययविभागेन व्युत्पत्तिरस्ति॥ आदिशब्दान्मण्डपादयः॥ यद्यपि नाम च धातुजमिति शाकटायनमतेन रूढानामपि व्युत्पत्तिभाजस्तथापि वर्णानुपूर्वीविज्ञानमात्रप्रयोजना तेषां व्युत्पत्तिर्न पुनरन्वयेऽर्थे प्रवृत्तौ कारणमिति रूढा अव्युत्पन्ना एव॥ यौगिकान्व्याचष्टे॥ योगोऽन्वय इत्यादिना॥ शब्दानां परस्परम्

व्युत्पत्तिरहिताः शब्दा रूढा आखण्डलादयः॥ योगोऽन्वयः स तु गुणक्रियासम्बन्धसम्भवः॥ २॥

योऽनुगमनमन्वयः स योगः स पुनर्योगो गुणक्रियायाः सम्बन्धाद्भवति॥ गुणो नीलपीतादिः॥ क्रिया करोत्यादिका सम्बन्धो वक्ष्यमाणः तेभ्यस्सम्भवो यस्य योगस्य स तथा॥ गुणक्रियासम्भवयोगेन यौगिकानामुदाहरणम्॥ २॥

हे०टी० २

गुणतो गुणनिबन्धनो येषां योगस्ते शब्दा नीलकण्ठाद्याः॥ नीलः कण्ठोऽस्येति गुणप्राधान्यान्नीलकण्ठः शङ्करः॥ आदिशब्दाच्छि
तिकण्ठः कालकण्ठ इत्यादि॥ संख्यापि गुण एवेति त्रिलोचनः। पञ्चबाणः। षण्मुखः। अष्टश्रवाः। दशग्रीव इत्यादि सङ्गृहीत
म्॥ क्रियातः क्रियानिबन्धो योगो येषां ते स्रष्टृप्रभञ्जनयः॥ सृजतीति सर्जनप्राधान्यात्स्रष्टा ब्रह्मा॥ एवं धाता इत्यादयः॥३॥ सम्ब

गुणतो नीलकण्ठाद्याः क्रियातः स्रष्टृसन्निभाः॥ स्वस्वामित्वादिसम्बन्धस्तत्राहुर्नाम तद्वताम्॥३॥ स्वात्पालधनभुग्भु
ग्नेतृपतिमत्वर्थकादयः॥ भूपालो भूधनो भूभुग्भूनेता भूपतिस्तथा॥४॥

न्धं व्याचष्टे स्वमात्मीयं स्वामीयस्तत्प्रभवस्तिमिस्तयोर्भावः स्वस्वामित्वं तदादिसम्बन्धः॥ आदिशब्दाज्जन्यजनकभावादिपरिग्र
हः॥ तत्र स्वस्वामिभावे सम्बन्धे पालादयः शब्दाः॥ स्वात्परे नियोजितास्तद्वतां स्वामिनां॥ नामसु॥ मत्वर्थक इति मतुस्तद्धितस्तस्यार्थो
ऽस्त्यर्थविशिष्टप्रकृत्यर्थेन सह देवदत्तादेः सम्बन्धः तदाधारे वा तदस्यास्त्यस्मिन्निति मतुरिति मतुप्रत्ययविधानात्॥ मतोरर्थो य
स्य स मत्वर्थकस्तद्धितो मतुना समानार्थ इत्यर्थः। स च इन्नणिकादिः॥ मत्वर्थीयमिच्छन्ति मतुरपि॥ आदिशब्दात्पादयोऽपि॥ तत्रा
हुर्नाम तद्वतामित्युत्तरेष्वप्यनुवर्तनीयम्॥४॥

क्रमेणोदाहरणान्याह॥इतिशब्दः प्रकारार्थस्तेनभूपादयोऽपि॥कवीनांरूढिःपरंपराऽऽयाताप्रसिद्धिस्तयाकविरूढ्यातिक्र
मेण यथाकपालीत्यादौसत्यपिस्वस्वामिभावसम्बन्धेकपालीतिमत्वर्थीयान्तएवभवति॥ननुकपालपालः॥कपाल
धनः॥कपालभुक्॥कपालनेता॥कपालपतिरित्यादि॥जन्यजनकभावसम्बन्धेयथा॥जन्यात्कार्यात्परेकृदादयस्तद्

भूमींश्वेनिकवेरूढ्याज्ञेयोदाहरणावली॥जन्यात्कार्यात्कर्तृस्रष्टृसृष्टिविधातृकरसूसमाः॥५॥

तोजनकानांकारणानांनामतः॥यथाविश्वकृत्॥विश्वकर्ता॥विश्वस्रष्टा॥विश्वस्रष्टा॥विश्वविधाता॥विश्वकरः॥विश्व
सूःब्रह्मा तस्यहिविश्वंजन्यमितिरूढिः॥समशब्दःप्राद्यर्थस्तेन विश्वकारकः॥विश्वजनकइत्याद्यपि॥कविरूढ्येत्ये
व नहियथाचित्रकृदुच्यते तथाचित्रसूरिति॥५॥

है०टी०
२

तथा जनकात्परे योन्यादयः शब्दास्तद्वतां कारणवतां कार्याणां नामानि॥ यथा आत्मयोनिः आत्मजः॥ आत्मरुट्॥ आ
त्मजन्मा॥ आत्मभूः॥ आत्मसूतिर्ब्रह्मा तस्य ह्यात्मकारणमिति स्थितिः॥ वक्ष्यमाणस्यादिशब्दस्याभिसम्बन्धात्सम्भ
वादयोपि दृश्यन्ते॥ शरणादयस्तु भृगोरपत्यं भार्गवः॥ दितेरपत्यं दैत्यः॥ वात्स्यस्यापत्यं वात्स्यायन इत्यादि॥ अत्रा
पि भार्गवादीनां भृग्वादयो जनका इति स्थितिः॥ कविरूढोन्यथैव न ह्यात्मयोनिवदात्मजनकः॥ आत्मकारक इति भवति॥

जनकाद्योनिजरुहजन्मभूसूत्यणादयः॥ धार्याद्ध्वजास्त्रपाण्यंकमौलिभूषणभृन्निभाः॥ ६॥

धार्यधारकभावसम्बन्धे यथा धार्यवाचकात्परे ध्वजादयो धारणाधारकस्य नामानि॥ यथा वृषध्वजः॥ शूलास्त्रः॥
पिनाकपाणिः॥ वृषाङ्कः॥ चन्द्रमौलिः॥ शशिभूषणः॥ शूलभृत्॥ निभग्रहणात्तत्सदृशा वृषकेतनः॥ शूलायुधः॥
वृषलक्ष्मा॥ चन्द्रशिराः॥ अन्यत्राभरणादयोपि दृश्यन्ते॥ ६॥

शिव
२

तथा पिनाकशाली॥शशिशेखरः॥शूली॥पिनाकमाली॥पिनाकं मस्तके धारयतीति कृत्वा॥पिनाकभर्त्ता॥गंगाधरः॥कवि
रूढ्येत्येव येन सत्यपि धार्यधारकसम्बन्धे न सर्वेभ्यो ध्वजाद्यर्थाः शब्दाः प्रयोज्याः॥न हि भवति वृषध्वजवत्॥शू
लध्वजः॥शूलास्त्रवच्चन्द्रास्त्रः॥पिनाकपाणिवत् अहिपाणिः॥वृषांकवत् चन्द्राङ्कः॥चन्द्रमौलिवत्॥गंगामौलिः
शशिभूषणवत्॥शूलभूषणः॥शूलशालिवत्॥चन्द्रशाली॥चन्द्रशेखरवत्॥गंगाशेखरः॥शूलिवत्॥शूलवान्॥
पिनाकमालिवत्॥सर्पमाली॥पिनाकभर्त्तृवत्॥चन्द्रभर्त्ता॥गंगाधरवत्॥चन्द्रधर इति॥भोज्यभोजकभावसम्बन्धे

शालिशेखरमत्वर्थमालिभर्त्तृधराद्यपि॥भोज्याद्भुगन्धोव्रतलिट्पायिपाशाशनादयः॥७॥

यथा भोज्यं भक्ष्यं तद्वाचिनः शब्दात्परे भुगादयः शब्दास्तद्युक्तं भोज्यवन्तं भोक्तारंगनामाहुः॥यथा अमृतभुजः॥अमृतान्ध
सः॥अमृतव्रताः॥अमृतलिहः॥अमृतपायिनः॥अमृतपाः॥अमृताशाः॥अमृताशनाः॥देवाः॥तेषां ह्यमृतं भोज्यमि
ति रूढिः॥आदिशब्दस्तत्समानार्थभोजनादिशब्दपरिग्रहाय॥कविरूढ्येत्येव नहि यथा अमृतभुजास्तथा अमृतवल्भा इ
ति भवति॥७॥

पतिकलत्रभावसम्बन्धे यथा॥ पतिर्वरयिता॥ तद्वाचकात्शब्दात्कान्तादिसदृशाः शब्दास्तद्वतानां पतिमतीनां भार्य्याणां संज्ञा
माहुः॥ यथा शिवकान्ता शिवप्रियतमा॥ शिववधूः॥ शिवप्रणयिनी गौरी॥ तस्या हि शिवः पतिरिति रूढिः॥ निभग्रहणादु
मेशवल्लभा प्रिया प्रभृतयो गृह्यन्ते॥ कविरूढेत्येव॥ नहि यथा भवति शिवकान्ता तथा शिवपरिग्रह इति॥ तथा कल
त्रवाचिनश्शब्दात्परे वरादयः शब्दास्तद्वतां कलत्रवतां वरयितृणां संज्ञामाहुः॥ यथा गौरीवरः॥ गौरीरमणः॥ गौरीप्रणयी॥

पत्युः कान्ताप्रियतमावधूप्रणयिनो निभाः॥ कलत्राद्वररमणप्रणयीशप्रियादयः॥ ८॥

गौरीशः॥ गौरीप्रियः॥ तस्या हि गौरी कलत्रमिति रूढिः॥ आदिशब्दात्तत्समानार्थाः पत्यादयो गृह्यन्ते॥ कविरूढेत्ये
वा॥ नहि भवति यथा गौरीवरः शिवस्तथा गङ्गावर इति॥ ८॥

सख्युः सखिसम्बन्धे यथा॥ सखिवाचकाच्छब्दात्परे सखिसमानार्थास्तद्वन्तं नामाहुः॥ यथा श्रीकण्ठस्य सखा श्रीकण्ठ
सखः कुबेरः॥ मधुसखः कामः॥ समन्नहरणन्तु हृदादयोऽप्यूह्यन्ते॥ कविरूढ्येत्येव॥ नहि भवति॥ यथा श्रीकण्ठसखो धन
दस्तथा धनदसखः श्रीकण्ठ इति॥ वाह्यवाहकभावसम्बन्धे यथा वाह्यवाचिनः शब्दात्परे गामिप्रभृतयः तद्वन्तं वाह्यव
न्तं वाहयितारं नामाहुः॥ यथा॥ वृषगामी॥ वृषयानः॥ वृषासनः शम्भुः तस्य हि वृषो यानमिति रूढिः॥ आदिशब्दाद्वृष
वाहन इत्यादयोऽपि॥ कविरूढ्येत्येव॥ नहि भवति यथा नरवाहनः कुबेरः तथा नरगामी॥ नरयान इत्यादि॥ ज्ञातिस्वजनः॥

सख्युः सखिसमाबाह्याद्गामियानासनादयः॥ ज्ञातेः स्वसृदुहित्रात्मजाग्रजावरजादयः॥ २९॥

तद्वाचिनः शब्दात्परे स्वस्रादयस्तद्वन्तं ज्ञातेयवतां ज्ञातीनां नामाहुः॥ स्वस्रादीनां च ज्ञातिविशेषवाचित्वात् ज्ञातिविशेषादेव
प्रयोगो यथा॥ यमस्वसा यमुना॥ हिमवद्दुहिता गौरी॥ चन्द्रात्मजो बुधः॥ गदाग्रजः इन्द्रावरजश्च विष्णुः॥ यमादयो हि यमु
नादीनां भ्रात्रादिज्ञातय इति रूढिः॥ आदिशब्दात्सोदरादयोऽप्यूह्यन्ते॥ यथा कालिन्दीसोदरो यमः॥ कविरूढ्येत्येव॥ नहि
भवति यथा यमुना यमस्वसा तथा शनिस्वसापि॥ ३०॥

आश्रयाश्रयिभावसम्बन्धे यथा आश्रयो निवासस्तद्वाचिनः शब्दात्परे सद्मपर्यायाः शयवासिसदादयश्च तद्वताम्
आश्रयवताम् आश्रितानां नामाहुः॥ यथा द्युसद्मानः॥ द्युसदनाः॥ दिवौकसः॥ दिवशब्दोहन्तावकारान्तोप्यस्ती
ति॥ द्युवसतयः॥ दिवाश्रयाः॥ द्युशयाः॥ द्युवासिनः॥ द्युसदो देवाः द्यौस्स्वर्गः स च तेषामाश्रय इति रूढिः॥ कविरूढ्ये
न्येव नहि भवति यथा द्युसद्मानो देवास्तथा भूमिसद्मानो मनुष्या इति॥ वध्यवधकभावसम्बन्धे यथा वध्यो घात्यः
तद्वाचिनः शब्दात्परे भिदादयः॥ अन्तकार्यादयोऽपि तद्वतां वधकानां नामाहुः॥ यथा पुरभित्॥ पुरद्वेषी॥ पुरजित्॥

आश्रयात्सद्मपर्यायशयवासिसदादयः॥ वध्याद्भिद्द्वेषिजिद्घातिध्रुग्रिपुध्वंसिशासनाः॥२०॥
अप्यन्तकारिदमनदर्पच्छिन्मथनादयः॥

पुरघाती॥ पुरध्रुक्॥ पुरारिः॥ पुरध्वंसी॥ पुरशासनः॥ पुरान्तकारी॥ पुरदमनः॥ पुरदर्पच्छित्॥ पुरमथनः॥ शिवः
तस्य हि पुरो वध्य इति रूढिः॥ आदिशब्दात्पुरहारी॥ पुरनिहन्ता॥ पुरकेतुः॥ पुरहा॥ पुरसूदनः॥ पुरान्तकः॥ पुरञ्जयी
ति॥ वध्य इति वधार्हमात्रेऽपि तेन कालियदमनः॥ कालियारिः॥ कालियशासनः॥ विष्णुः॥ इत्यादयोप्यूह्यन्ते॥ क
विरूढ्येन्येव तेन कालियदमनादिवत् कालियघातीति न भवति॥

उक्ताः स्वस्वामित्वादयस्सम्बन्धभेदाः तेच यथाभिन्नद्रव्याश्रयास्तथैकद्रव्याश्रयत्वाऽपि भवन्तीति दर्शयितुमाह॥
विविक्षानिबन्धनो हि सम्बन्धस्तत एकस्मादपि वृषादेः सम्बन्धिपदात्परे सम्बन्धान्तरनिबन्धनाद्वाहनादयश्शब्दा
यथोचितं प्रयुज्यन्त एतदेवाह॥ दृश्यतइत्या दिना॥१२॥ वाह्यवाहकभावसम्बन्धविविक्षायां यथा वृषवाहनो रु

विवक्षितो हि सम्बन्ध एकत्रैपि पदान्ततः॥१२॥ प्राक्प्रदर्शितसम्बन्धिशब्दा योज्या यथोचि
तम्॥ दृश्यते खल्वु वाह्यत्वे वृषस्य वृषवाहनः॥१४॥ स्वत्वे पुनर्वृषपतिर्द्धार्य्यत्वे वृषलाञ्छनः
॥ अपरोद्धार्य्यत्वेंऽशुमाली स्वत्वेंऽशुपतिरंशुमान्॥१३॥

द्र इति॥ तथा स्वस्वामिभावसम्बन्धविविक्षायां वृषपतिः॥ धार्य्यधारकभावसम्बन्ध
विविक्षायांच वृषलाञ्छन इत्यपि॥ तथाधार्यधारकभावसम्बन्धविविक्षायां॥ यथा अंशुमाली रविरिति भ
वति॥ स्वस्वामिभावसम्बन्धविविक्षायामंऽशुपतिरंशुमानित्यपि॥१३॥

हे॰टी॰
६

तथावध्यवधकभावसम्वन्धे यथाऽहिरिपुर्मयूरः॥ तथाभोज्यभोजकभावसम्वन्धेऽप्यहिभुगित्यपिभवति सम्वन्धनिवन्ध
नां व्युत्पत्तिमुक्त्वाव्युत्पत्त्यन्तरमाह॥ चिह्नैर्विशेषणैर्व्यक्तैर्निस्सन्देहैर्ज्ञातोऽप्यभिधायकोऽपि शब्दो व्यक्तैर्वाचको

वध्यत्वेऽहेरहिरिपुर्भोज्यत्वे चाहिभुक्शिखी॥ चिह्नैर्व्यक्तैरवेद्यक्तैर्ज्ञातिशब्दोऽपिवाचकः॥१४॥

भवेत्॥ व्यक्तोनामनंतायातीत्यर्थः॥१५॥

शिव
६

तथाहीत्यादिनोदाहरणमाह॥ अगस्तिनामुनिविशेषेणपूतास्वस्तिमत्यापवित्रिताइतिव्यक्तंचिह्नंतेनचिह्नितोदिगितिङ्गातिशब्दोदक्षिणाशयाव्यक्तेऽभिधायीभवति॥ एवंसप्तर्षिपूतादिगुत्तरदिशा॥ अत्रेर्नयनसमुत्थंज्योतिश्चन्द्रइत्यादयोऽपि॥ त्रिपंचसप्तादिस्थानेषुअयुग्विषमशब्दौ॥ त्रिनेत्रादिषुपदेषुयोजनीयौ॥ यथा त्रिनेत्रोऽयुग्नेत्रोविषमनेत्रश्चशङ्करः॥ पञ्चेषुरयुगिषुर्वैषम्येषुश्चकामः॥ सप्तपलाशः अयुक्पलाशोविषमपलाशश्चसप्तपर्णः॥ उभय

तथाह्यगस्तिपूतादिग्दक्षिणाशानिगद्यते॥ अयुग्विषमशब्दौत्रिपञ्चसप्तादिवाचकौ॥१५॥
त्रिनेत्रपञ्चेषुसप्तपलाशादिषुयोजयेत्॥ गुणशब्दोविरोध्यर्थेनञादिरितरेतरः॥१६॥

त्रादिशब्दात्रवशक्तिरयुक्शक्तिर्विषमशक्तिश्चशम्भुः॥ एवंत्र्यक्षपञ्चबाणसप्तच्छदादिष्वपि॥ गुणेत्यनन्तरमाह॥ गुणवाचीशब्दोनञ्पूर्वइतरशब्दोत्तरश्चविरोधिनमर्थमभिधत्ते॥

हे०टी०
७

यथा ऽसितः सितेतरऽस्त्रक्रमः॥ एवमक्रशंकरेतरऽस्त्रस्थूलइत्यादि॥ व्युत्पन्त्यन्तरमाह॥ वार्द्ध्यादिषु शब्देषु पूर्वस्मिन्नेव
पदे पर्य्यायस्य परिवर्त्तनं भवति यथा वार्द्धिर्जलधिस्तोयधिः॥ अप्यादि शब्दस्य न हरणाज्जलदस्तोयदो नीरद इत्यादि॥
वडवाग्न्यादिषु शब्देषु उत्तरस्मिन्नेव पदे पर्य्यायस्य परिवर्त्तनं यथा वडवाग्निर्वडवानलो वडवाग्निः॥ अप्यादि शब्दास्सरो
जं सरोरुहमित्यादि॥१७॥ भूभृदाद्येषु शब्देषु द्वयेपि पूर्वे ऽत्रोत्तरस्त्वेव पदे पर्य्यायस्य परिवर्त्तनं यथा॥ भूभृत्॥ उर्वी

अभिधत्ते यथा क्रमः स्यादसितः सितेतरः॥ वार्द्ध्यादिषु पदे पूर्वे वाडवाग्न्यादिषूत्तरे॥१७॥
द्वयेपि भूभृदाद्येषु पर्य्यायपरिवर्त्तनम्॥ एवं परान्हृत्तिसहा योगाः स्युरिति योगिकाः॥१८॥

भृत्॥ भूधरः॥ उर्वीधरः॥ आद्यशब्दात्सुरपति देवराज इत्यादयः॥ एवमिति पूर्वेऽत्रोत्तरऽत्रोभयत्रच परान्हृत्तिः पर्य्यो
यपरिवर्त्तनं सहन्ते क्षमन्ते परान्हृत्तिसहा वार्द्ध्यादयः शब्दाः॥ योगादन्वयाद्भवेयुरिति योगिकाः॥१८॥

शिव
७

गीर्वाणादयः शब्दाः पूर्वोत्तरत्रोभयपदे पर्यायपरत्वेन्निमसहमानाः मिश्रा योगयुक्ता रूढिमन्तश्चात्राभिधानचि
न्तामणौ नाममालायां प्रवक्ष्यन्ते सन्निभग्रहणात् दशरथकृतान्तप्रभृतयः॥१९॥ लिङ्गमिति पुंल्लिङ्गं स्त्रीलिङ्गं नपुं
सकलिङ्गं मिश्रलिङ्गं च अस्मदुपलिङ्गानुशासनाज्ज्ञेयं निर्णेतव्यम्॥ अत एवास्माभिरमरकोशाद्यभिधानमाला
स्विवात्रलिङ्गनिर्णयो नोक्तः॥ इह तु विनेयजनानुग्रहार्थं सन्दिग्धं लिङ्गानां नानालिङ्गानां च शब्दानां लिङ्गनिर्ण
यो वक्ष्यते इह हि मुक्तगतिर्देवगतिर्मनुष्यगतिस्तिर्यग्गतिर्नारकगतिरिति जीवानां पञ्च गतयो भवन्ति॥ तद्भेदाज्जीवाश्च

मिश्राः पुनः परागत्य सहा गीर्वाणसन्निभाः॥ प्रवक्ष्यन्तेऽत्र लिङ्गन्तु ज्ञेयं लिङ्गानुशासनात्॥१९
देवाधिदेवाः प्रथमे काण्डे देवा द्वितीयके। नरस्तृतीये तिर्यञ्चस्तुर्ये एकेन्द्रियादयः॥२०॥

पि मुक्ताः देवा मनुष्याः तिर्यञ्चो नारकाश्चेति पञ्चधा भवन्ति॥ ततोऽभिधास्यमानरूढयौगिकमिश्रसविभागमु
क्ता प्रथमादिकाण्डेऽभिधास्यमानमुक्तादिनामक्रमनिर्देशमाह॥ देवाधिदेवा इत्यादिना॥२०॥२१॥२२॥

देवाधिदेवा अर्हन्तो वर्त्तमानातीतानागताः ॥ तद्वाचकाः शब्दा अपि देवाधिदेवाः वाच्यवाचकयोरभेदोपचारात् एवं वक्ष्यमा
णदेवादिष्वपि योज्यमासां गा इति सर्वत्र सम्बध्यते ॥ ततः प्रथमे काण्डे गणधराद्यैर्युक्ता सह देवाधिदेवास्सर्वे प्राधान्यात् ॥ द्वि
तीये काण्डे देवाः साङ्गाः ॥ तृतीये काण्डे मनुष्याः साङ्गाः ॥ चतुर्थे तिर्यंचस्साङ्गाः ॥ ते चैकेन्द्रियादयः तत्रैकं स्पर्शनमिन्द्रि
यं येषां ते । एकेन्द्रियाः पृथ्वीकायादयः पञ्च तत्र पृथ्वीकायोऽनेकविधः शुद्धपृथ्वी शर्करावालुकादिभिः ॥ अप्का
यो हिमादिः ॥ तेजःकायोऽङ्गारादिः ॥ वायुकाय उत्कलिकादयः ॥ वनस्पतिकायः शेवलादिः ॥ द्वे स्पर्शनरसने त्रीणि स्पर्श
नरसनघ्राणानि चत्वारि तान्येव चक्षुस्सहितानि इन्द्रियाणि येषां ते तथा ॥ ततो द्वीन्द्रियाः कृम्यादयः ॥ त्रीन्द्रियाः पिपी

एकेन्द्रियाः पृथिव्यम्बुतेजोवायुमहीरुहः ॥ कृमिपीलुकलूताद्याः स्युर्द्वित्रिचतुरिन्द्रियाः ॥ २१ ॥
पंचेन्द्रियाश्च भेकेकिमत्स्याद्याः स्थलखाम्बुगाः ॥ पञ्चेन्द्रिया एव देवा नरा नैरयिका अपि ॥ २२

लिकादयः चतुरिन्द्रिया लूतादयः पञ्च स्पर्शनादीनि श्रोत्रसहितानि इन्द्रियाणि येषां ते पंचेन्द्रियाः ते च त्रिविधाः ॥ स्थल
चराः खचराः ॥ अम्बुचराश्च तत्र स्थलचरा भेकाद्याः खेचराः केकिप्रभृतयः ॥ अम्बुचरा मत्स्याद्याः देवा नारकाश्च पञ्चेन्द्रिया एव न
तु तिर्यंच इव एकद्वित्रिचतुरिंद्रिया अपि पंचमे काण्डे नारकाः सांगाः ॥ षष्ठे काण्डे साधारणाः सामान्यवाचिनः ॥ षष्ठ एव का
ण्डे प्रसङ्गोप्यते प्रक्रंस्यते इति ॥ तुशब्दोऽन्ते यस्यासौ त्वन्तः ॥ अथशब्द आदिर्यस्यासावथादिश्च शब्दः ॥ पूर्वेन गच्छति ॥ अग्रिमेण
सम्बध्यत इत्यर्थः ॥ न्यायसिद्धं चैतत् तुना पूर्वस्माद्विशेषद्योतनात् ॥ अथशब्देन चाधोन्तरारम्भात् ॥ यथा स्याद्वेनन्तजिदनन्तः स्

विधिस्तुपुष्पदन्त इति॥ मुक्तिर्मोक्षोऽपवर्गोऽथ मुमुक्षुः श्रमणो यतिरिति भिक्षान्नस्थानविषयं चेतदिति॥२३॥ चतुस्त्रिंशदतिशया
सुरेन्द्रादिकृतां पूजां चार्हतीत्यर्हन् सुगद्विषाहः शत्रिशत्रुस्तुत्य इत्यत्र शत्रुप्रत्ययः अरिहननात् रजोहननात् रहस्याभावाच्चे
ति वा पृषोदरादित्वात्॥ जयति रागद्वेषमोहानिति जिनः॥ जीलशीदीवुध्यविमीभ्यः किदिति नः संसारस्य प्रयोजनजातस्य वा
पारं पर्यन्तं गतः पारगतः॥ त्रीन्कालान्वेत्तीति त्रिकालवित्॥ क्षीणान्यष्टौ ज्ञानावरणीयादीनि कर्माण्यस्य क्षीणाष्टकर्मा॥ परमे
पदे तिष्ठतीति परमेष्ठी॥ परमात्स्थः किदिति इनि प्रत्यये नीरुक्षानादित्वात् षत्वं सप्तम्या अलुक् च॥ जगतामधीश्वरस्ते

नारकाः पञ्चमे सांगाः षष्ठे साधारणाः स्फुटम्॥ प्रज्ञाप्यन्तेऽव्ययाश्चात्रानन्तापायादिना पूर्वगे॥२२

अर्हन् जिनः पारगतस्त्रिकालवित् क्षीणाष्टकर्मा परमेष्ठ्यधीश्वरः॥ शंभुः स्वयंभूर्भगवान् ज
गत्प्रभुस्तीर्थंकरस्तीर्थकरो जिनेश्वरः॥२४॥

वशीलोऽधीश्वरः॥ स्थेशभासपिसकसो वरः इति वरः॥ शं शाश्वतसुखं तत्र भवति शंभुः॥ शंसंस्वयंविप्राद्भुवो डुरिति डुः॥ स्वयमात्म
ना तथा भव्यत्वादिसामग्रीपरिपाकात् न तु परोपदेशात् भवति स्वयम्भूः॥ भगो जगदैश्वर्यं ज्ञानं वाऽस्त्यस्य भगवान्॥ अति
शयेन मतुः जगतां प्रभुः जगत्प्रभुः॥ तीर्यते संसारसमुद्रोऽनेनेति तीर्थं॥ प्रवचनाधारश्चतुर्विधः संघः प्रथमगणधरो
वा॥ यदाहुः॥ तित्थं भंते तित्थं तित्थयरे तित्थं गोयमा अरिहा ताव नियमा तित्थंकरे तित्थं पुण चाउव्वण्णे समणसंघे पढमगण
हरे वा॥ तत्करोतीति तीर्थंकरः॥ हेतुतच्छीलानुकूल इति टः नवा सिततत्र वंत इत्यत्र योगविभागव्याख्यानाद्मोऽन्तः॥ रागादिजेतारो
जिनाः केवलिनस्तेषामीश्वरो जिनेश्वरः॥२५॥

देवाधिदेवाश्चार्हन्तो वर्त्तमानातीतानागताः ॥ तद्वाचकाः शब्दा अपि देवाधिदेवाः वाच्यवाचकयोरभेदोपचारात् एवं वक्ष्यमा
णा देवादिष्वपि योज्यम् आसां आ इति सर्वत्र सम्बध्यते ॥ ततः प्रथमे काण्डे गणधराद्युक्तैः सह देवाधिदेवाः स्वप्राधान्यात् ॥ द्वि
तीये काण्डे देवाः साङ्गाः ॥ तृतीये काण्डे मनुष्याः साङ्गाः ॥ चतुर्थे तिर्यञ्चः साङ्गाः ॥ ते चैकेन्द्रियादयः तत्रैकं स्पर्शनमिन्द्रि
यं येषां ते ॥ एकेन्द्रियाः पृथ्वीकायादयः पञ्च तत्र पृथ्वीकायोऽनेकविधः शुद्धपृथ्वीशर्करावालुकादिभिः ॥ अप्का
यो हिमादिः ॥ तेजःकायोऽङ्गारादिः ॥ वायुकाय उत्कलिकादयः ॥ वनस्पतिकायः शैवलादिः ॥ द्वे स्पर्शनरसने त्रीणि स्पर्श
नरसनघ्राणानि चत्वारि तान्येव चक्षुस्सहितानि इन्द्रियाणि येषां ते तथा ॥ ततो द्वीन्द्रियाः कृम्यादयः ॥ त्रीन्द्रियाः पिपी

एकेन्द्रियाः पृथिव्यम्बुतेजोवायुमहीरुहः ॥ कृमिपीलुकलूताद्याः स्युर्द्वित्रिचतुरिन्द्रियाः ॥ १ ॥
पंचेन्द्रियाश्च भेकेकिमत्स्याद्याः स्थलखाम्बुगाः ॥ पञ्चेन्द्रिया एव देवा नरा नैरयिका अपि ॥ २

लिकादयः चतुरिन्द्रिया लूतादयः पञ्च स्पर्शनादीनि श्रोत्रसहितानि इन्द्रियाणि येषां ते पंचेन्द्रियाः ते च त्रिविधाः ॥ स्थल
चराः खचराः ॥ अम्बुचराश्च तत्र स्थलचरा भाद्याः खचराः केकिप्रभृतयः ॥ अम्बुचरा मत्स्याद्याः देवा नारकाश्च पञ्चेन्द्रिया एव न
तु तिर्यञ्च एवं एकद्वित्रिचतुरिन्द्रिया अपि पंचमे काण्डे नारकाः साङ्गाः ॥ षष्ठे काण्डे साधारणाः सामान्यवाचिनः ॥ षष्ठ एव का
ण्डे प्रसङ्गो ध्वनेः प्रक्रंस्यते इति ॥ तु शब्दोऽन्तो यस्यासौ अन्तलः ॥ अथ शब्द आदिर्यस्यासावथादिश्च शब्दः ॥ पूर्वेन गच्छति ॥ अग्रिमेण
सम्बध्यत इत्यर्थः ॥ न्यायसिद्धं चैतत् तु ना पूर्वस्माद्विशेषद्योतनात् ॥ अथशब्देन चाधोन्तरारम्भात् ॥ यथा स्यादेनन्नजिदन्तः सु

विधिस्तुपुष्यदन्त इति॥ मुक्तिर्मोक्षोपवर्गोऽस्यमुमुक्षुः श्रमणो यतिरिति भिधानस्थानविषयं चेतदिति॥२३॥ चतुस्त्रिंशन्तमतिशया
स्सुरेन्द्रादिकृतां पूजां चार्हतीत्यर्हन् सुगद्विषाहेः शत्रिशत्रुस्तुत्यश्च्यन्त शप्रत्ययः अरिहननात् रजोहननात् रहस्याभावाच्चे
ति वा पृषोदरादित्वात्॥ जयति रागद्वेषमोहानितिजिनः॥ जीलृषणीदीवुध्याविभ्यः किदिति नः संसारस्य प्रयोजनजातस्य वा
पारं पर्यं गतः पारगतः॥ त्रीन्कालान्वेत्ति त्रिकालवित्॥ क्षीणान्यष्टौ ज्ञानावरणीयादीनि कर्माण्यस्य क्षीणाष्टकर्मा॥ परमे
पदे तिष्ठतीति परमेष्ठी॥ परमात्स्थः किदितीशिनि निप्रत्ययो नीरुष्ठानादित्वात्षत्वं सप्तम्या अलुक्च॥ जगतामधीष्टेऽस्ये

नारकाः पञ्चमे सांगाः षष्ठे साधारणाः स्फुटम्॥ प्रज्ञो व्यन्तेऽव्ययाश्चात्र न तन्त्वादीन पूर्वगे॥२३

अर्हन्जिनः पारगतस्त्रिकालवित्क्षीणाष्टकर्मा परमेष्ठ्यधीश्वरः॥ शंभुः स्वयंभूर्भगवान्ज
गत्प्रभुस्तीर्थंकरस्तीर्थकरो जिनेश्वरः॥२४॥

वंशीलोऽधीश्वरः॥ स्थेशभासपिसकसो वरइति वरः॥ शं शाश्वतसुखं तत्र भवतीति शंभुः॥ शं संस्वयं विप्राद्भुवो डुरिति डुः॥ स्वयमात्म
ना तथा भव्यत्वादिसामग्रीपरिपाकात् न तु परोपदेशान्न भवति स्वयम्भूः॥ भगो जगदैश्वर्यं ज्ञानं वाऽस्त्यस्य भगवान्॥ प्रति
शरणत्वेन भनुः जगतां प्रभुः जगत्प्रभुः॥ तीर्यते संसारसमुद्रोऽनेनेति तीर्थं॥ प्रवचनाधारश्चतुर्विधः संघः प्रथमगणधरो
वा॥ यदाहुः॥ तित्थंभंते तित्थं तित्थयरे तित्थं गोयमा अरिहा ताव नियमा तित्थंकरे तित्थं पुण चाउवण्णे समणसंघे पढमगण
हरे वा॥ तत्करोतीति तीर्थंकरः॥ हेतुतच्छीलानुकूल इति टः न वाऽसितत्स्वंतस्य त्वयो गविभागव्याख्यां द्वामोऽन्तः रागादि जेतारो
जिनाः केवलिनस्तेषां ईश्वरो जिनेश्वरः॥२५॥ ना

हे०टी०
८

स्यादित्यव्ययमनेकांतवाचकं ततः स्यादित्यनेकांतं वदतीत्येवंशीलः स्याद्वादी स्याद्वादो स्यास्तीति वा स्याद्वादी यौगिकत्वादने
कांतवादीत्यपि॥ भयमिह परलोकादानाकस्मादाजीवमरणाश्लाघाभेदेन सप्तधा एतत्प्रतिपक्षतोऽभयं विशिष्टमात्मनः
स्वास्थ्यं निःश्रेयसधर्मनिबंधनभूमिकाभूतं तत्तत्र गुणप्रकर्षादचिंत्यशक्तियुक्तत्वात्सर्वथा परार्थैककारित्वात्तद्ददातीत्य
भयदः॥ सर्वेभ्यः प्राणिभ्यो हितः सार्वः॥ सर्वीय इत्यपि॥ सर्वोन्नेवेति सर्वो गण्ड्र॥ सर्वं जानातीति सर्वज्ञः॥ सर्वं पश्यतीत्येवंशी

स्याद्वाद्यभयदः सार्वः सर्वज्ञः सर्वदर्शिकेवलिनौ॥ देवाधिदेवबोधिदपुरुषोत्तमवीतरागाप्ताः॥२५॥

लः सर्वदर्शी सर्वथावरणविलये चेतनस्वरूपाविर्भावः केवलं तदस्यास्तीति केवली॥ देवानामप्यधिदेवो देवाधिदेवः॥ बोधि
जिनप्रणीतधर्मप्राप्तिस्तां ददातीति बोधिदः॥ पुरुषाणामुत्तमः सहजतथाभव्यत्वादिभावतः श्रेष्ठः पुरुषोत्तमः॥ वीतो गतो रागोऽ
स्मादिति वीतरागः॥ हितोपदेशकत्वादाप्तवदाप्तः॥२५॥ एतस्यामिति॥ वर्त्तमानायामवसर्पिण्यां दशसागरोपमकोटीकोटिप्रमाणायां

शिव
८

कालविशेषे॥ ऋषति गच्छति परमपदमिति ऋषभः॥ ऋषिवृषिलुषिभ्यः कित्ऽभेत्यभः॥ यद्वा ऊर्वोर्वृषलांछनमभूद्भगवतो जनन्या
च चतुर्द्दशानां स्वप्नानामादौ वृषभो दृष्टस्तेन ऋषभः॥ परीषहादिभिर्न जितः अजितः॥ यद्वा गर्भगतेऽस्मिन्द्यूते राज्ञा जननी न जिते
त्यजितः॥ शं सुखं भवत्यस्मिन् स्तुते शम्भवः॥ यद्वा गर्भगते प्यस्मिन्नभ्यधिकसस्यसंभवात्॥ संभवोपि॥ अभिनन्द्यते देवेन्द्रादिभिरि
त्यभिनन्दनः॥ भुजादित्वादनुट्॥ यद्वा गर्भात्प्रभृत्येवाभीक्ष्णं शक्रेणाभिनन्दनादभिनन्दनः॥ शोभना मतिरस्य सुमतिः॥ यद्वा गर्भे

एतस्यामवसर्पिण्यामृषभोऽजितसंभवौ॥ अभिनन्दनः सुमतिस्ततः पद्मप्रभाभिधः॥२६॥

स्थे जनन्याः सुनिश्चिता मतिरभूदिति सुमतिः॥ निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभा यस्य स पद्मप्रभः॥ यद्वा पद्मशयन
दोहदो मातुर्देवतया पूरित इति॥ पद्मवर्णोऽस्य भगवानिति वा पद्मप्रभः॥२६॥ शोभनौ पार्श्वौ अस्य सुपार्श्वः॥ यद्वा गर्भस्थे भ
गवति जनन्यपि सुपार्श्वाभूदिति सुपार्श्वः॥ चन्द्रस्येव प्रभा ज्योत्स्ना सौम्यलेश्याविशेषोस्य चन्द्रप्रभः॥ तथा गर्भस्थे देव्या
श्चन्द्रपानदोहदोऽभूदिति चन्द्रप्रभः॥ शोभनो विधिर्विधानमस्य सुविधिः॥ यद्वा गर्भस्थे भगवति जनन्यप्येवमिति सुविधिः॥

सकलसत्वसन्तापहरणात् शीतलः॥तथा गर्भस्थे भगवति पितुः पूर्वोत्पन्नाचिकित्स्यपित्तदाहो जननीकरस्पर्शादुपशान्त
इति शीतलः॥श्रेयांसावसावस्य श्रेयांसः॥पृषोदरादित्वात्॥तथा गर्भस्थेऽस्मिन्केनाप्यनाक्रान्तपूर्वी देवताधिष्ठितश
य्याजनन्याऽऽक्रान्तेति श्रेयो जातमिति श्रेयांसः॥वसुपूज्यस्य नृपतेरयं वासुपूज्यः॥यद्वा गर्भस्थेऽस्मिन्वसुहिरण्यं
तेन॥वासवो राजकुलं पूजितवानिति॥वसवो देवविशेषास्तेषां पूज्यो वा वसुपूज्यः॥प्रज्ञाद्यणि वासुपूज्यः॥विगतो मलोऽस्य वि

सुपार्श्वश्चन्द्रप्रभश्च सुविधिश्चाथ शीतलः॥श्रेयांसो वासुपूज्यश्च विमलोऽनन्ततीर्थकृत्॥२७॥

मलः॥विमलज्ञानादियोगाद्वा विमलः॥यद्वा गर्भस्थे मातुर्मतिस्तनुश्च विमला जातेति विमलः॥न विद्यते गुणानामन्तो यस्य
अनन्तः॥अनन्तजिदेशो वाऽनन्तः भीमो भीमसेन इति न्यायात्॥स चासौ तीर्थकृच्चानन्ततीर्थकृत्॥२७॥दुर्गतौ प्रपतन्तं स
सत्त्वसङ्घातं धारयतीति धर्मः॥तथा गर्भस्थे जननी दानादिधर्मपरा जातेति धर्मः॥शान्तियोगात्तदात्मकत्वात्तत्कर्तृकत्वाद्वायं
शान्तिः॥तथा गर्भस्थे पूर्वोत्पन्नाशिवशान्तिरभूदिति शान्तिः॥कुः पृथ्वी तस्यां स्थितवानिति कुन्थुः॥पृषोदरादित्वात्॥०॥

तथा गर्भस्थे भगवति जननी रत्नानां कुन्थुराशिं दृष्टवतीति कुन्थुः॥ सर्वो नाम महासत्वकुले य उपजायते तेन स्याभिवृद्धये वृद्धैरसावर
उदाहृत इति वचनादरः॥ तथा गर्भस्थे भगवति जनन्याः स्वप्ने सर्वरत्नमयोऽरो दृष्ट इत्यरः॥ परीषहादिमल्लजयान्निरुक्तान्मल्लिः॥
तथा गर्भस्थे भगवति मातुः॥ सुरभिकुसुममाल्यशयनीये दोहदो देवतया पूरित इति मल्लिः॥ मन्यते जगतस्त्रिकालावस्थामिति मुनिः
॥ मनेरुदेतौ चास्य वेति इ प्रत्यये उपान्त्यस्योत्वम्॥ शोभनानि व्रतान्यस्येति सुव्रतः॥ मुनिश्चासौ सुव्रतश्च मुनिसुव्रतः॥ तथा गर्भस्थे
जननी मुनिवत्सुव्रता जातेति मुनिसुव्रतः॥ परीषहोपसर्गादिनाम नात्॥ नमेस्तु वेति विकल्पेनोपान्त्यस्याकाराभावपक्षे नमिः॥ यद्वा॥

धर्मः शान्तिः कुन्थुररो मल्लिश्च मुनिसुव्रतः॥ नमिर्नेमिः पार्श्वो वीरश्चतुर्विंशतिरर्हताम्॥ २८ ॥

गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः॥ धर्मचक्रस्य नेमिवन्नेमिः नेमीति नन्तोपि दृश्यते यथा वन्दे सुव्रतमे
निनाविति॥ स्पृशति ज्ञानेन सर्वभावानिति पार्श्वः॥ तथा गर्भस्थे जनन्या निशि शयनीयस्थयाऽन्धकारे सर्पो दृष्ट इति गर्भानुभा
वोयमिति मत्वा पश्यतीति निरुक्तात्पार्श्वः॥ पार्श्वोस्य वैयावृत्यकरो यक्षस्तस्य नाथः पार्श्वनाथः॥ भीमो भीमसेन इतिन्या
याद्वा पार्श्वः॥ विशेषेण ईरयति प्रेरयति कर्माणीति वीरः॥ एवमवसर्पिण्यामर्हतां तीर्थकराणां चतुर्विंशतिरिति॥ २८॥

हे०टी०
११

वृषभलाञ्छनत्वाद्वृषभः सकलभुवनस्यापि प्रशस्यतेमत्वेन॥ अनन्तकर्मांशान्जयति अनन्तैर्ज्ञानादिभिर्वा जयत्यनन्तजित्
॥यद्वा॥ गर्भस्थितेजनन्याऽनन्तरत्नदाम दृष्टं॥ जयति च त्रिभुवनेपीत्यनन्तजित्॥ पुष्पकलिकामनोहरदन्तत्वात्पुष्पद
न्तः॥ मुनिः सुव्रतैकदेशः सुव्रतः॥ सत्यभामा भामेति न्यायात्॥ तथा मुनिरपि भीमो भीमसेनवत्॥ २९॥ अरिष्टस्याशुभ
स्य नेमिरिव प्रध्वंसकत्वादरिष्टनेमिः॥ यद्वा गर्भस्थे भवति जनन्यारिष्टरत्नमयो महान्नेमिर्दृष्ट इति रिष्टनेमिः॥ अपश्चि

श

ऋषभो वृषभः श्रेयान् श्रेयांसः स्यादनन्तजिदनन्तः॥ सुविधिस्तु पुष्पदन्तो मुनिसुव्रतसुव्रतौ तुल्यौ॥
२९॥ अरिष्टनेमिस्तु नेमिर्वीरश्चरमतीर्थकृत्॥ महावीरो वर्द्धमानो देवार्यो ज्ञातनन्दनः॥ ३०॥०॥

मादिशावत्॥ तत्पूर्वत्वेऽरिष्टनेमिः चरमः पश्चिमोऽन्तिम इति यावत्॥ स चासौ तीर्थकृच्च चरमतीर्थकृत् अन्तरंगा
रि॥ जेतृत्वान्महांश्चासौ वीरश्च महावीरः॥ उत्पत्तेरारभ्य ज्ञानादिभिर्वर्द्धते इति वर्द्धमानः॥ यद्वा गर्भस्थे भगवति ज्ञातकुलं धनधा
न्यादिभिश्च वर्द्धत इति वर्द्धमानः॥ देवश्चासावर्यश्च देवार्य्यः॥ देवैरर्यतेऽभिगम्यत इति वा देवानामिन्द्रादीनामार्य्यः पूज्यः
स्वामीति वा॥ ज्ञातकुलोत्पन्नत्वात्॥ ज्ञातः सिद्धार्थराजा तस्य नन्दनो ज्ञातनन्दनः॥ ३०॥

शिव
११

अस्य वीरजिनस्य चरमस्य गणानां संघाः समूहा गणा लोचनवसंख्या यद्यपि परमेश्वरस्यैकादश गणधरा आसन् ॥ तथापि न
वानामेव गणधराणां विभिन्ना वाचना अभवन् ॥ अकंपिताचलभ्रात्रोर्मेतार्यप्रभासयोश्च युतयः ॥ सदृशा एव वाचना
अभूवन्निति नवैव गणाः ॥ यदवोचाम ॥ त्रिषष्टिशलाकापुरुषचरिते ॥ श्रीवीरनाथस्य गणधरेष्वेकादशस्वपि द्वयो
र्द्वयोर्वाचनयोः साम्यादासन् गणा नवेति ॥ इन्द्रोऽस्य भूयादितीन्द्रभूतिः ॥ अग्निरस्य भूयादित्यग्निभूतिः ॥ वायुरस्य भूया
दिति वायुभूतिः ॥ तिसृणां नाम्नामिति त्रिकं ॥ एते त्रयोऽपि गौतमस्यापत्यानि वृद्धानि ॥ अथ विह्वसीत्यरा भगवत्याङ्गिरस्कुं सेन्या

गणानां नवानां स्यर्षिसंघा एकादश गणाधिपाः ॥ इन्द्रभूतिरग्निभूतिर्वायुभूतिश्च गौतमाः ॥ ३१ ॥
व्यक्तः सुधर्मा मण्डितमौर्यपुत्रावकंपिताः ॥ अचलभ्राता मेतार्यप्रभासश्च पृथक्कुलाः ॥ ३२ ॥

दिनात्तस्य तु पितु गौतमाः गौतमवंशजाः ॥ ३१ ॥ व्यक्तनेत्ति गुरुरिति व्यक्तो भारद्वाजगोत्रः ॥ शोभनो धर्मोऽस्य सुधर्मा अ
ग्निवैश्यगोत्रजः ॥ द्विपदाद्धर्मादनित्यसमासान्तः ॥ गुरुर्मेरुण्डते स्म मण्डितः ॥ मौर्यस्य पुत्रो मौर्यपुत्रः मण्डितमौर्ययोः
पुत्राविति मण्डितपुत्राविति मण्डितपुत्रोऽपि ॥ एतौ वाशिष्ठकाश्यपौ ॥ न कम्पितवान् अकम्पितो गौतमः ॥ अचलस्य भ्राता हारीत
गोत्रः ॥ मां लक्ष्मीमितः प्राप्तो मेतः स चासावार्यश्च मेतार्यः ॥ प्रभासते प्रभासः एतौ कौण्डिन्यौ एवं पृथग्विभिन्नानि कुला
न्येषां पृथक्कुलाः ॥ ३२ ॥

केवलीननुतीर्थकरः चरमोन्तिमः अतः परम् एतस्यामवसर्पिण्यां केवलिनामसम्भवाद्दुरारान्नमयत्वेन जम्बूरिव जम्बूः
सचासौस्वामी च जम्बूस्वामी॥ प्रभवत्यस्मात्॥ श्रुतमिति प्रभवः स चासौ प्रभुश्च प्रभवप्रभुः॥ शय्यायांभवतीति शय्य
म्भवः॥ पृषोदरादित्वात्॥ यशसा भद्रः कल्याणमस्य यशोभद्रः॥ सम्भूतौ राज्याश्रिविजयेऽस्य सम्भूतिविजयः॥३३॥ भद्रो

केवली चरमो जम्बूस्वाम्यथ प्रभवप्रभुः॥ शय्यंभवो यशोभद्रः संभूतिविजयस्ततः॥३३॥ भद्र
बाहुः स्थूलभद्रः श्रुतकेवलिनो हि षट्॥ महागिरिसुहस्त्याद्या वज्रान्ता दशपूर्विणः॥३४॥

चबाहू अस्य भद्रबाहुः॥ स्थूलमुपचितं भद्रं कल्याणमस्य स्थूलभद्रः॥ एते षट् श्रुतेन केवलिनः श्रुतकेवलिनः॥ चतुर्दशपू
र्वधरत्वात्॥ परीषहाद्युपद्रवैरकम्प्यत्वात् महागिरिरिव महागिरिः॥ कर्मद्रुमोन्मूलने सुहस्ती आद्यो येषां ते तथा गुरु वसुहस्तीर
त्वाद्वज्र इव वज्रो वज्रस्वामी सोऽन्ते येषां ते वज्रान्ताः दशभिः पूर्वैरगो दशपूर्विणः दशपूर्वधराः दशपूर्वाण्येषां सन्तीत्यर्थः॥३४

ततः परं दृशपूर्वधरारणमसम्भवात्॥ इक्ष्वाकुकुसम्भूतास्स्याद्द्वाविंशतिरर्हताम्॥ इक्ष्वाकुनामधेयं कुलं वंशः इक्ष्वाकुकुलं तत्र
सम्भूता जाताश्चार्हतामृषभादीनां द्वाविंशतिः शेषं स्पष्टम्॥३४॥ नद्यत्यन्यायिनो हाकारादिभिर्नीतिभिरिति नाभिरन्त्यः कु
लकरः नहेर्भवेन्प्रत्ययः॥१॥ जिता शत्रवो येनेति जितशत्रुः॥२॥ जिताश्चारयो येनेति जितारिः॥३॥ संवरणो नीन्द्रियाणां संव
रः॥४॥ सकलसत्वसन्तापहरणान्मेघ इव मेघः॥५॥ धरति धात्रीमिति धरः॥६॥ प्रतितिष्ठति धर्मकार्ये प्रतिष्ठः॥७॥

इक्ष्वाकुकुलसंभूताः स्याद्द्वाविंशतिरर्हताम्॥ मुनिसुव्रतनेमी तु हरिवंशसमुद्भवौ॥३५॥ नाभि
श्चाजितशत्रुश्च जितारिरथ संवरः॥ मेघो धरः प्रतिष्ठश्च महसेननरेश्वरः॥३६॥ सुग्रीवश्च दृ
ढरथो विष्णुश्च वसुपूज्यराट्॥ कृतवर्मा सिंहसेनो भानुश्च विश्वसेनराट्॥३७॥०॥

महापूज्या सेना ऽस्य महसेनः॥८॥ स चासौ नरेश्वरश्च महसेननरेश्वरः॥३६॥८॥ शोभना ग्रीवास्य सुग्रीवः॥९॥ दृढो
रथोऽस्य दृढरथः॥१०॥ वेवेष्टि वलैः पृथ्वीं विष्णुः॥११॥ वस्येराजभिर्वसुभिर्धनैः पूज्यत इति वसुपूज्यः स चासौ राट् च व
सुपूज्यराट्॥१२॥ कृतं वर्मानेन कृतवर्मा॥१३॥ सिंहवत्पराक्रमवती सेनास्य सिंहसेनः॥१४॥ भाति त्रिवर्गेण भानुः॥१५॥ वि
श्वव्यापिनी सेनास्य विश्वसेनः स चासौ राट् च विश्वसेनराट्॥३७॥१६॥

समुद्रस्यापिविजेता

हे०टी० तेजसासूरइवसूरः॥१७॥शोभनंदर्शनमस्यसुदर्शनः॥१८॥गुणरत्नपयसामाधारभूतत्वात्कुम्भइवकुम्भः॥१९॥शोभनानिमि
१३ त्राण्यस्यसुमित्रः॥२०॥विजयतेशत्रूनितिविजयः॥२१॥गाम्भीर्येणसमुद्रविजयः॥२२॥अश्वप्रधानासेनास्यअश्वसेनः
॥२३॥सिद्धाअर्थाःपुरुषार्थाअस्यसिद्धार्थः॥२४॥इतिऋषभादीनांतीर्थंकराणांक्रमेणचतुर्विंशतिःपितरः॥२५
मरुद्भिर्दीव्यतेस्तूयतेमरुदेवा पृषोदरादित्वात्तलोपः॥मरुदेव्यपि॥१॥विजयतेविजया॥२॥सहइनेनजितारिस्वामि
नावर्ततेसेना॥३॥सिद्धार्थोऽस्याःसिद्धार्था॥४॥मंगलहेतुत्वान्मंगला॥५॥शोभनासीमामर्यादाऽस्याःसुसीमा॥६

सूरःसुदर्शनःकुंभःसुमित्रोविजयस्तथा॥ समुद्रविजयश्चाश्वसेनःसिद्धार्थएवच॥३८॥ मरुदेवा
विजयासेनासिद्धार्थाचमंगला॥ततःसुसीमापृथ्वीलक्ष्मणारामाततःपरं॥३९॥नन्दाविष्णु
जयाश्यामासुयशाःसुव्रताऽचिरा॥श्रीर्देवीप्रभावतीचपद्मावप्राशिवातथा॥४०॥

स्थिरापृथ्वीवपृथ्वी॥७॥लक्ष्मीःशोभाऽस्त्यस्यालक्ष्मणा॥८॥धर्मकृत्येषुरमतेरामा॥९॥आनन्दतिसुपुत्रेणनन्दा
१०॥वेवेष्टिगुणैर्जगदितिविष्णुः॥जयतिसतीत्वेनजया॥१२॥श्यामवर्णत्वात्श्यामा॥१३॥शोभनंयशोऽस्याःसुयशाः
१४॥शोभनंव्रतमस्याःसुव्रता।पतिव्रतत्वात्॥१५॥नचिरयतिधर्मकार्येषुअचिरा॥१६॥श्री रिवश्रीः॥१७॥देवीवदेवी॥१८॥
प्रभास्त्यस्याःप्रभावती॥पद्मेववपतिधर्मबीजमितिवप्रा॥२०॥भीरुध्रीतिरः॥शिवहेतुत्वात्शिवा॥४०॥२२॥

शिव
१३

मनोज्ञत्वाद्वामा पापकार्येषु प्रातिकूल्यत्वाद्वामा॥२३॥ त्रीणि ज्ञानदर्शनचारित्राणि शलति प्राप्नोति त्रिशला॥२४॥
सिद्धार्थादश्च इति क्रमेण ऋषभादीनां महतां चतुर्विंशति मातर इति॥ गोरिव मुखोऽस्य गोमुखः॥ महांश्चासौ
यक्षश्च महायक्षः॥ त्रीणि मुखान्यस्य त्रिमुखः यक्षाणां नायको यक्षनायकः॥४४॥ तुम्बति त्वर्द्दयति विघ्नान् तुम्बरुः॥
तुम्बेहरित्यरुः॥ कुस्यति पुष्यति पद्मप्रभोपासनाय कुसुमः॥ उद्धुरिकुल्यतीति कुसुमः॥ मातंग इव महाबलत्वान्मातंगः॥

वामा त्रिशला क्रमतः पितरो मातरोऽर्हतां॥ स्याद्गोमुखो महायक्षस्त्रिमुखो यक्षनायकः॥४५॥ तुम्बुरुः
कुसुमश्चापि मातङ्गो विजयोऽजितः॥ ब्रह्मा यक्षेट् कुमारः षण्मुखः पातालकिन्नरः॥४६॥

विजयते विजयः॥ न जीयते स्मेत्यजितः॥ बृंहति वर्द्धते प्रभावोऽस्मिन्निति ब्रह्मा॥१०॥ यक्षाणामीशो यक्षेट्॥ कुमार
यति क्रीडयति कुमारः॥ षण्मुखान्यस्य षण्मुखः॥ पातं रक्षति पान मालमनर्थो नेन पातालः॥ किंचिन्नरः किन्नरः॥४७॥

गरुडइवगरुडः पचंडत्वात्॥ गंधं यज्ञेऽर्दयति विघ्नान् गन्धर्वः यक्षाणामीशो यक्षेट्॥ कुत्सितं वेरं शरीरमस्य कुवेरः
॥ हरणं निर्वांछितमसौ वरुणः॥ भृकुटिभीषणत्वात् भृकुटिः॥ गां मेधते पवित्रीकरोति गोमेधः॥ पार्श्वजिनस्य
सदा पार्श्वेऽस्य इति पार्श्वः सदानत्पार्श्ववर्त्तित्वाद्वा॥ मातंगइव महाबलत्वात्मातंगः॥ एते चतुर्विंशतिरपि यक्षाः क्र
मेणार्हतामृषभादीनामुपासकाः॥ ४३॥ चक्रस्येश्वरी चक्रेश्वरी॥ अप्रतिचक्रेत्यपि १ बलेन न जितेत्यजितबला

गरुडो गन्धर्वो यक्षेट् कुवेरो वरुणोऽपि च॥ भृकुटिर्गोमेधपार्श्वौ मातङ्गोऽर्हदुपासकाः॥ ४३॥
चक्रेश्वर्यजितबला दुरितारिश्च कालिका॥ महाकाली श्यामा शान्ता भृकुटिश्च सुतारका॥ ४४॥

रजदन्तादित्वात्पूर्वनिपातः॥ अजितेत्यपि भीमसेनवत्॥ दुरितानामरिर्दुरितारिः॥ काल्येव कालिका वर्णेन म
हती चासौ काली च महाकाली॥ कांचनवर्णा याऽपि संज्ञा॥ श्यामा वर्णेन अच्युतादेवीत्यपि॥ शाम्यति पूजया शां
ता॥ भीषणभृकुटित्वाद्भृकुटिः॥ शोभना तारकाऽस्याः सुतारका॥ सुतारेत्यपि॥ ४४॥

ऽविद्यमानः शोकोऽस्याऽशोका॥ मानवीव मानवी॥ ऽभिगम्यदर्शनत्वात्॥ चण्डाप्रचण्डात्वात् लोकैर्विद्य
तेज्ञायते विदिता॥ ऽंकुशमस्त्यस्याऽंकुशा ऽभ्राादित्वादः कमित्यव्ययं कंकुत्सितंगर्वेतिदृप्यति कन्दर्पा नि
र्वातिभक्तानांदुःखाग्निरनया निर्वाणी बलमस्त्यस्याबला मातुर्लिंगादीन्यवश्यंधरति धारणी धरणेरंगेन्द्रस्य
प्रिया धरणप्रिया॥४५॥ वैरोट्यानरेभ्योदत्तमनयानरदत्ता गांधरयतीतिगंधारी पृषोदरादित्वात्॥ लोकाना

अशोकामानवीचण्डाविदिताचाङ्कुशातथा॥ कन्दर्पानिर्वाणीबलाधारिणीधरणप्रिया॥४५॥
नरदत्ताऽथगान्धार्यम्बिकापद्मावतीतथा॥ सिद्धायिकाचेतिजैन्यःक्रमाच्छासनदेवताः॥४६॥

मम्बेवाम्बिका कूष्माण्डीन्यपि॥ पद्मंकरेऽस्त्यस्याःपद्मावती ऽनजिरादीतिमतोदीर्घत्वं॥ सिद्धानयते सिद्धायि
का एवमेताश्चतुर्विंशतिरपिजिनानामृषभादीनांभक्ताः क्रमेणजिनशासनस्याधिष्ठाञ्योदेवताः शासनदेवताः

हे॰टी॰ वृषादयश्चतुर्विंशतिरर्हतां ऋषभादीनां ध्वजाश्चिह्नानि एते च दक्षिणाङ्गविनिवेशिनो लाञ्छनभेदा इति॥४७॥
२५
४७॥४८॥नेमिमुनीत्यरिष्टनेमिमुनिसुव्रतौ अन्ये इति उक्तेभ्योऽन्ये ऋषभादयः षोडश॥४९॥उत्सर्पिण्यामि

नरदत्ताऽथगान्धार्य्यम्बिकापद्मावती तथा॥सिद्धायिका चेति जैनेन्द्र्यः क्रमाच्छासनदेवताः॥४६
वृषो गजोऽश्वः प्लवगः क्रौञ्चोऽब्जं स्वस्तिकः शशी॥मकरः श्रीवत्सः खड्गी महिषः सूकरस्त
था॥४७॥श्येनो वज्रं मृगश्छागो नन्द्यावर्त्तो घटोऽपि च॥कूर्मो नीलोत्पलं शङ्खः फणी सिंहोऽर्ह
तां ध्वजाः॥४८॥रक्तौ च पद्मप्रभवासुपूज्यौ शुक्लौ तु चन्द्रप्रभपुष्पदन्तौ॥कृष्णौ पुनर्नेमिमुनी वि
नीलौ श्रीमल्लिपार्श्वौ कनकत्विषोऽन्ये॥४९॥उत्सर्पिण्यामतीतायां चतुर्विंशतिरर्हताम्॥के भूतार्हतामेकैकं चतुर्विंशतिः॥२
वलज्ञानी निर्वाणी सागरोऽथ महायशाः॥५०॥
ति॥दशसागरोपमकोटीकोटिप्रमाणायां कालविशेषरूपायामतीतायामित्यतिक्रान्तायां तीर्थङ्कराणां चतुर्विंशतिर्यथा॥केव
लज्ञानमस्यास्ति केवलज्ञानी निर्वाणमस्यास्ति निर्वाणी॥गाम्भीर्येण सागर इव सागरः॥महद्व्यापकत्वाद्यशोऽस्य महायशाः॥५०

शिव
२५

विगतोमलोस्यविमल ॥ सर्वेज्ञसर्वेसत्वाद्नुभूतिरस्य सर्वानुभूतिः॥ मुक्तिश्रियंधरतिश्रीधरः॥ दानंदत्तंतदस्यास्तिदत्त
स्सचासौतीर्थकृञ्च दत्ततीर्थकृत॥ जन्माभिषेकेसुरैःक्षिप्तंपुष्पदामकरण्डान्नमवमानमुदरेऽस्यदामोदरः॥ शोभनमा
ह्लादकत्वात्तेजोस्यसुतेजाः॥ जगतांस्वाम्यास्वामी॥ मुनिश्चासौसुव्रतश्चमुनिसुव्रतः॥ ५१॥ शोभनामतिरस्यसुम

विमलः सर्वानुभूतिः श्रीधरोदत्ततीर्थकृत॥ दामोदरः सुतेजाश्चस्वाम्यथोमुनिसुव्रतः॥ ५१॥
सुमतिः शिवगतिश्चैवास्तागोऽथनिमीश्वरः॥ अनिलोयशोधराख्यः कृतार्थोऽथजिनेश्वरः॥ ५२

तिः॥ शिवेमोक्षेगतिरस्यशिवगतिः॥ नविद्यतेगाम्भीर्यात्स्तागोलब्धमध्यतास्यअस्तागः॥ परीषहोपसर्गादिना
मनाग्निमिः॥ नमेस्तुवेतिइरूपान्यस्यचेतं॥ सचासावीश्वरः निमीश्वरः॥ अनिलइवमहाबलत्वादनिलः॥ यशां
सिधरतियशोधरः॥ कृतोर्थःप्र जाऽस्यकृतार्थः॥ जिनश्चासावीश्वरश्चजिनेश्वरः॥ ५३॥

हे०टी
२६

शुद्धा निर्मला मतिरस्य शु[द्ध]मतिः ॥ शिवं करोतीति शिवकरः ॥ स्पन्दते देशनामृतं स्पन्दनः ॥ नित्यप्रवृत्तत्वेन ध्यायमान
त्वात्संप्रतिः ॥२७॥ भाविन्यामित्यागामिन्यामुत्सर्पिण्यां चतुर्विंशतिस्तीर्थकरा यथा ॥ पद्मं नाभावस्य पद्मनाभः ॥ नाभेर्नो
म्नीत्यपात्समासान्तः ॥ रागादीन्वृत्तिभ्यूरो विक्रमी स चासौ देवः शूरदेवः ॥ शोभनौ पार्श्वावस्य सुपार्श्वः ॥ स्वार्थिके के
सुपार्श्वकः ॥५३॥ स्वयं प्रकर्षेण भाति शोभते स्वयंप्रभः ॥ सर्वेसत्त्वास्सर्वानुभूतिरस्य सर्वानुभूतिः ॥ देवैः श्रुतः प्रती

शुद्धमतिः शिवकरः स्पन्दनश्चाथ संप्रतिः ॥ भाविन्यां तु पद्मनाभः शूरदेवः सुपार्श्वकः ॥५३॥
भाव्यर्हतामेकैकं चतुर्विंशतिः पद्मनाभादयः२ स्वयंप्रभश्च सर्वानुभूतिर्देवश्रुतोदयौ ॥ पेढालः पोट्टिलश्चापि शतकीर्तिश्च सुव्रतः ॥५४॥

तो देवश्रुतः ॥ उदेति धर्मोऽस्मादित्युदयः ॥ वक्ति पठतीति नत्वं पेढालः चाल्वालकं कालेत्यादिशब्दादालान्तो निपात्यते ॥
पोदयति भासते पुटति जन्मतश्च वृक्षान्नत्रयं पोषति छ्यतीति वा पोट्टिलः ॥ स्थण्डिलकपिलेत्यादिशब्दान्निपात्यते शतं
वह्न्यः कीर्तयोऽस्य शतकीर्तिः ॥ शोभनं व्रतमस्य सुव्रतः ॥५४॥

शिव
१६

नास्तिममतास्यसऽप्यममः॥निर्गताःकषायायस्मान्निष्कषायः॥निश्चितंपोलनितित्वानेनमहान्भवतिनिष्पुला
कः॥प्युभिरप्रहविदिपुलिस्युभ्यःकिंदित्याकः॥निर्गममतास्मान्निर्ममः॥चित्ताराययाश्चर्यकारीरितरगुप्तानिमनो
वाक्कायगुप्तयोस्यचित्रगुप्तः॥सदासमाधियुक्तत्वात्समाधिः॥सम्वरआश्रवनिरोधोस्त्यस्यसंवरः॥यशो

अममोनिष्कषायश्चनिष्पुलाकोऽथनिर्ममः॥चित्रगुप्तःसमाधिश्चसंवरश्चयशो
धरः॥५४॥विजयोमल्लदेवौचानन्तवीर्यश्चभद्रकृत्॥एवंसर्वावसर्प्पिण्युत्सर्प्पिणी
षुजिनोत्तमाः॥५६॥

धरतियशोधरः॥५४॥विजयतेजन्मादिकल्याणैर्विजयः॥कर्मभटानांमल्लइवमल्लः॥दीव्यतित्तानश्रिया
देवः॥अनन्तंवीर्यम्बलमस्यअनन्तवीर्यः॥भद्रंकरोतिभद्रकृत्॥भद्रोपि॥उपसंहारमाह॥एवंसर्वावसर्प्पि
णीषुजिनोत्तमाः॥५६॥

हे०व० १७

एवमितिचतुर्विंशतिश्चतुर्विंशतिः सर्वोऽस्तु वर्त्तमानातीतानागतास्तु तेषामिति तीर्थंकराणां देहः कायो ऽद्भुतलोकोत्तरं रूपं
गन्धश्च यस्य [illegible] स तथा निरामयो नीरोगः स्वेदेन प्र[illegible] जलेन मलेन च त्व[illegible]गावारककिट्टिनोज्झितः स्वेदमलोज्झितः
॥ एष प्रथमः सहोत्थो ऽतिशयः ॥ १ ॥ श्वासउच्छ्वासनिश्वासं अब्जं पद्मं तस्येव गन्धो ऽस्याब्जगन्धः ॥ इति द्वितीयः ॥ २ ॥
रुधिरं चामिषं च अप्राणिप श्वादेरिति समाहारे रुधिरामिषं मांसशोणितं गोक्षीरधारावद्धवलं पाण्डुरं अप्रवि

अर्हतां देहादिवर्णनम्

तेषां च देहो ऽद्भुतरूपगन्धो निरामयः स्वेदमलोज्झितश्च ॥ श्वासो ऽब्जगन्धो रुधिरामिषं तु गोक्षीर
धाराधवलं ह्यविस्रं ॥ ५७ ॥ आहारनीहारविधिस्त्वदृश्यश्चत्वार एते ऽतिशयाः सहोत्थाः ॥ क्षेत्रे स्थि
तिर्योजनमात्रके ऽपि नृदेवतिर्यग्जनकोटिकोटेः ॥ ५८ ॥

स्रमनामगन्धि इति तृतीयः ॥ ३ ॥ आहारो ऽभ्यवहरणं ॥ नीहारो मूत्रपुरीषोत्सर्गस्तयोर्विधिः क्रिया न दृश्यत इति अदृश्यः ॥
मांसचक्षुषा न पुनरवध्या[illegible]दिलोचनेन पुंसा ॥ यदाहुः ॥ पच्छन्ने आहारनीहारे न समंसचक्खुणा एष चतुर्थः ॥ एते चत्वारो
ऽपि जगतो ऽप्यतिशेरते तीर्थंकरशरीरिरिति अतिशयाः सहोत्थाः सहजन्मानः ॥ अथ कर्मक्षयजानतिशयानाह योजनप्र
माणे ऽपि क्षेत्रे समवसरणभुवि नृणां देवानां तिरश्चां च जनानां कोटीकोटिसंख्यानां स्थितिरवस्थानमिति प्रथमः कर्मक्षयजो

शिव १७

वाणीभाषाऽप्यर्द्धमागधी नरतिर्यक्सुरलोकभाषासंवदति तद्भाषाभावेन परिणमतीत्येवंशीला योजनमेकं
गच्छति व्याप्नोतीत्येवंशीला योजनगामिनी चेति द्वितीयः॥२॥ भामंडलं प्रभामंडलं मौलिपृष्ठे शिरःपश्चिमभागे
तच्छविडम्बितदिनकरबिम्बलक्ष्मीकमित्यतएवचारु मनोहरमिति तृतीयः॥३॥ साग्रे पंचविंशतियोजनावधिके गव्यू
तिः क्रोशद्वयं गव्यूतीनां शतद्वये योजनशत इत्यर्थः॥ रुजारोगो ज्वरादिर्न स्यादिति चतुर्थः॥४॥ तथा वैरं परस्पर

वाणी नरतिर्यक्सुरलोकभाषासंवादिनी योजनगामिनी च॥ भामंडलं चारु च मौलिपृष्ठे वि
डम्बिताहर्पतिमंडलश्रीः॥ साग्रे च गव्यूतिशतद्वये रुजा वैरेतयो मार्यतिवृष्ट्यवृष्टयः॥

विरोधो न स्यादिति पंचमः॥ तथा ईतिर्धान्याद्युपद्रवकारी प्रचुरो मूषिकादिः प्राणिगणो न स्यादिति षष्ठः॥ त
था मारिरौत्पातिकं सर्वगतं मरणं न स्यादिति सप्तमः॥ तथातिवृष्टिर्निरन्तरं वर्ष
णं न स्यादिति अष्टमः॥ तथा अवृष्टिः सर्वथा वर्षाभावो न स्यादिति नवमः॥

दुर्भिक्षं भिक्षाणामभावेन स्यादिति दशमः॥ तथा स्वराष्ट्रपरराष्ट्राच्च भयं न स्यादित्येकादशः॥ एवमेकादशातिशयाः कर्मणां ज्ञानावरणीयादीनां चतुर्णां घातात्क्षयाज्जायन्त इति॥ ६०॥ देवकृतानतिशयानाह॥ खे आकाशे धर्मप्रकाशकं चक्रं धर्मचक्रं भवतीति देवकृतः प्रथमोऽतिशयः॥ तथा खे चामराः इति द्वितीयः॥ तथा खे पादपीठेन

दुर्भिक्षमन्यस्वकचक्रतो भयं स्यान्नैत एकादश कर्मघातजाः॥ खे धर्मचक्रं चमराः सपादपीठं मृगेन्द्रासनमुज्ज्वलं च॥ छत्रत्रयं रत्नमयध्वजोंऽघ्रिन्यासे च चामीकरपंकजानि॥ ६१॥ ०॥

सह मृगेन्द्रासनं सिंहासनमुज्ज्वलं निर्मलमाकाशस्फटिकमयत्वादिति तृतीयः॥ तथा खे छत्रत्रयमिति चतुर्थः॥ तथा खे रत्नमयो ध्वज इति पंचमः॥ तथा पादन्यासनिमित्तं स्वर्णकमलानि भवन्तीति षष्ठः॥ ६१॥

तथा समवसरणे रत्नसुवर्णरूप्यमयं प्राकारत्रयं मनोज्ञं भवतीति सप्तमः॥ तथा चत्वारि मुखानिश्रंगानि गात्रा
णि च यस्य स तथा तद्भावश्चतुर्मुखांगता भवतीति अष्टमः॥ तथा चैत्याभिधानो द्रुमोऽशोकवृक्षः स्यादिति नव
मः॥ तथाऽधोमुखाः कण्टका भवन्तीति [illegible] दशमः॥ तथा द्रुमाणामानतिर्नम्रता स्यादिति एकादशः॥ तथा उच्चैर्भु
वनव्यापी दुन्दुभिध्वानः स्यादिति द्वादशः॥ वातः सुखदत्वादनुकूलो भवतीति त्रयोदशः॥ तथा शकुनाः पक्षिणः प्रद

वप्रत्रयं चारु चतुर्मुखांगता चैत्यद्रुमोऽधोवदनाश्च कंटकाः॥ द्रुमानतिर्दुन्दुभि
नाद उच्चकैर्वातोनुकूलः शकुनाः प्रदक्षिणाः॥१४॥ गन्धाम्बुवर्षं बहुवर्णपुष्पवृष्टिः कच
श्मश्रुनखाप्रवृद्धिः॥ चतुर्विधामर्त्यनिकायकोटिर्जघन्यभावादपि पार्श्वदेशे॥१५॥०॥

क्षिणं गतयः स्युरिति चतुर्दशः॥ तथा गन्धोदकवृष्टिरिति पंचदशः॥ बहुवर्णानां पंचवर्णानां जानूत्सेधप्रमाणपुष्पा
णां वृष्टिः स्यादिति षोडशः॥ तथा कचानां केशानां श्मश्रूणां च श्मश्रुणः कूर्चस्य नखानां च पाणिपाद
जानामप्रवृद्धिरवस्थितस्वभावाचमिति सप्तदशः॥ तथा भवनपत्यादिचतुर्विधदेवनिकायानां जघन्यतोपि समीपे कोटि
र्भवतीति अष्टादशः॥१५॥

तथाऋतूनांवसन्तादीनांसर्वदापुष्पादिसामग्रीभिरिन्द्रियार्थानांस्पर्शरसगन्धरूपशब्दानामपमनोज्ञानामपक
र्षेणमनोज्ञानांचप्रादुर्भावेनानुकूलत्वंभवतीत्येकोनविंशः॥इतिदेवैःकृताएकोनविंशतिस्तीर्थकृतामतिशयाः॥एते
चयदन्यथापिदृश्यन्ते॥तन्म तान्तरमवगम्यमितितैश्चसहजैश्चतुर्भिःकर्मक्षयजैरेकादशभिर्देवैःकृतैरेकोनविं

ऋतूनामिन्द्रियार्थानामनुकूलत्वमित्यमी॥एकोनविंशतिर्दैव्याश्चतुस्त्रिंशच्चमीलि
जिनवाग्गुणाःमेकैकंपंच
त्रिंशत॥२
ताः॥६४॥संस्कारवत्त्वमौदात्यमुपचारपरीतता॥मेघनिर्घोषगंभीर्यंप्रतिनादविधा
यिता॥६५॥
शन्याःसहमीलिताएकत्रयोजिनाश्चतुस्त्रिंशद्भवन्तीति॥अथवचनातिशयानाह॥संस्कारवत्त्वंसं स्कृ
तादिलक्षणयुक्तत्वम्॥१॥औदात्यमुच्चैर्वृत्तिता २॥उपचारपरीतता ऽग्राम्यत्वम्॥३॥मेघगम्भीरघो
षत्वं॥मेघस्येवगम्भीरशब्दत्वम्॥४॥प्रतिनादविधायिताप्रतिरवोपेतत्वम्॥५॥

दक्षिणत्वं सरलत्वम्॥६॥ उपनीतरागत्वं मालवकैशिक्यादिग्रामरागयुक्तता॥७॥ एते सप्त शब्दापेक्षा व्र
जिशयाः अन्ये त्वर्थाश्रयाः तत्र महार्थता बृहदभिधेयता॥८॥ अव्याहतत्वं पूर्वापरवाक्यार्थाविरोधः॥९॥
शिष्टत्वमभिमतसिद्धान्तोक्तार्थता वक्तुः शिष्टतासूचकत्वं वा॥१०॥ संशयानामसम्भवोपि सन्दिग्धत्व

दक्षिणत्वमुपनीतरागत्वं च महार्थता। अव्याहतत्वं शिष्टत्वं संशयानामसम्भवः॥
६६॥ निराकृतान्योत्तरत्वं हृदयंगमताऽपि च। मिथःसाकांक्षता प्रस्तावौचित्यं तत्त्वनिष्ठ
ता॥६७॥

म्॥११॥ निराकृतान्योत्तरत्वम्॥ परदूषणाविषयता॥१२॥ हृदयंगमता हृदयग्राह्यत्वम्॥१३॥ मिथस्साकांक्षता परस्परे
ण पदानां वाक्यानां वा सापेक्षत्वम्॥१४॥ प्रस्तावौचित्यं देशावसरकालाव्यतीतत्वम्॥१५॥ तत्त्वनिष्ठता विवक्षितवस्तुस्व
रूपानुसारिता॥१६॥

हे॰टी॰ २०

अप्रकीर्णप्रसृतत्वं ।। सुसम्बन्धस्य सतः प्रसरणम् ।। अथवाऽसम्बद्धाधिकारत्वातिविस्तरयोरभावः ।।१७।। अस्वश्लाघाऽन्यनिन्दिता ।। आत्मोत्कर्षपरनिन्दाविप्रयुक्तत्वम् ।।१८।। आभिजात्यं वक्तुः प्रतिपाद्यस्य वा भूमिकानुसारिता ।।१९।। अतिस्निग्धमधुरत्वं घृतगुडादिवत्सुखकारित्वम् ।।२०।। प्रशस्यता उक्तगुणयोगात्प्राप्तश्लाघ्यता ।।२१।। अमर्मवे

अप्रकीर्णप्रसृतत्वमस्वश्लाघान्यनिन्दिता ।। आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता ।।६८।। अमर्मवेधितौदार्यं धर्मार्थप्रतिबद्धता ।। कारकाद्यविपर्यासो विभ्रमादिवियुक्तता ।।६९।।

धिता परमर्मानुद्घट्टनस्वरूपत्वम् ।।२२।। औदार्यमभिधेयस्यार्थस्यातुच्छत्वम् ।।२३।। धर्मार्थप्रतिबद्धता धर्मार्थाभ्यामनपेतत्वम् ।।२४।। कारकाद्यविपर्यासः कारककालवचनलिङ्गादिव्यत्ययवचनदोषापेतता ।।२५।। विभ्रमादिवियुक्तता विभ्रमो वक्तृमनसो भ्रान्तता स आदिर्येषां विक्षेपादीनां स विभ्रमादिर्मनोदोषस्तेन विप्रयुक्तत्वम् ।।२६।।६९।।

शिव २०

चित्रकृत्त्वमुत्पादिताच्छिन्नकौतूहलत्वम् ॥२७॥ अद्भुतत्वं प्रतीतत्वम् ॥२८॥ तथानतिविलम्बितार्थप्रतीतता ॥२९॥ अनेकजातिवैचित्र्यं जात
योवर्णनीयवस्तुस्वरूपवर्णनानितत्संश्रयाद्विचित्रत्वम् ॥३०॥ आरोपितविशेषता वचनांतरापेक्षया आहितविशेषणत्वम् ॥३१
सत्वप्रधानता साहसोपेतता ॥३२॥ वर्णपदवाक्यविविक्तता वर्णादीनां विच्छिन्नत्वम् ॥३३॥ अव्युच्छित्तिर्विवक्षितार्थसम्यक्सिद्धिं याव
दव्यवच्छिन्नवचनप्रमेयता ॥३४॥ अखेदित्वमनायाससम्भवः ॥३५॥ इत्येवमर्हतां पंचत्रिंशद्वाचां गुणा अतिशया भवन्तीति ॥७१॥ दान

चित्रकृत्त्वमद्भुतत्वं तथानतिविलम्बिता ॥ अनेकजातिवैचित्र्यमारोपितविशेषता ॥७०॥
सत्त्वप्रधानता वर्णपदवाक्यविविक्तता ॥ अव्युच्छित्तिरखेदित्वम्पञ्चत्रिंशच्च वाग्गुणाः
जिनदोषाभावाना मेकैकमष्टादश अन्तराया दानलाभवीर्यभोगोपभोगगाः ॥ हासो रत्यरती भीतिर्जुगुप्सा शोक एव च ॥७२

गतोऽन्तराय इत्येको दोषः ॥ लाभगतोऽन्तराय इति द्वितीयः ॥ वीर्यगतोऽन्तराय इति तृतीयः ॥ भुज्यते भोगः स्रगादिः ॥ तद्गतोऽन्तराय इ
ति चतुर्थः ॥ उपभुज्यते उपभोगोऽङ्गनादिः तद्गतोऽन्तराय इति पञ्चमः ॥ हासो हास्यमिति षष्ठः ॥ रतिः पदार्थानामुपरि प्रीतिरिति सप्त
मः ॥ अरती रतिविपर्यय इति अष्टमः ॥ भीतिर्भयमिति नवमः ॥ जुगुप्सा घृणेति दशमः ॥ शोकश्चित्तवैधुर्यमित्येकादश ॥७२॥

कामोमन्मथइतिद्वादश॥मिथ्यात्वंदर्शनमोहइतित्रयोदश॥अज्ञानंमोहमितिचतुर्दश॥निद्रास्वापइतिपञ्चदश॥अविरतिरप्र
त्याख्यानमितिषोडश॥रागःसुखाभिज्ञस्यसुखानुस्मृतिपूर्वःसुखेतत्साधनेवाभिमतेविषयेगर्द्धइतिसप्तदश॥द्वेषोदुःखा
भिज्ञस्यदुःखानुस्मृतिपूर्वोदुःखेतत्साधनेवाक्रोधइत्यष्टादशदोषास्तेषामभावादीनामेतांनभवन्तीति॥७३॥महानानन्दोऽत्रमहा
नन्दः॥नास्तिमृतमत्रेत्यमृतम्॥सिद्धमस्यामितिसिद्धिः॥सर्वकर्मक्षयात्केवलस्यात्मनोभावःकैवल्यम्॥नपुनर्भवोजन्मात्रापु

कामोमिथ्यात्वमज्ञानंनिद्राचाविरतिस्तथा॥रागोद्वेषश्चनोदोषास्तेषामष्टादशाप्यमी॥७३॥महानन्दोऽमृतंसिद्धिःकैवल्यमपुनर्भवः॥शिवंनिःश्रेयसंश्रेयोनिर्वाणंब्रह्मनि
मोक्षस्याष्टादश२ र्वृतिः॥७४॥०॥

नर्भवः॥नपुनर्भवतीतिवा॥सदानन्दमग्नैःशय्यतेस्थीयतेऽस्मिन्नितिशिवम्॥शीङापोह्रस्वश्चवेड्डिवः॥निश्चितंश्रेयोऽत्रनिःश्रेयसं॥
निसश्चश्रेयसइत्यत्समासान्तः॥अतिशयेनप्रशस्यंश्रेयः॥गुणाङ्गाद्विष्ठेयसौप्रशस्यस्यश्रइतिश्रादेशः॥निर्वात्यात्मात्रेति
निर्वाणम्॥निर्वाणमवातइतिसाधुः॥बृंहतिवर्द्धतेऽस्मिन्नानन्दइतिब्रह्म॥पुंक्लीबलिङ्गः॥निर्व्रियतेसुखीभूयतेऽस्यामितिनिर्वृतिः॥७४॥

महान् ज्ञानस्योदयोऽत्रेति महोदयः॥ सर्वदुःखानां क्षयोऽत्र सर्वदुःखक्षयः॥ निर्यान्ति सर्वदुःखान्यत्रेति निर्याणम्॥ न क्षरति न चलत्यस्मादा
त्मेत्यक्षरम्॥ अश्यन्ते प्राप्यन्ते क्षीणकर्मभिरिति वा॥ मीज्यजिमामद्यशेर्वस्तिकिभ्यः सर इति सरः॥ कर्मभिर्मुच्यतेऽत्र मुक्तिः॥ मु
च्यते सर्वकर्मभिरिति मोक्षः॥ मावावद्यमीति सः॥ मोक्ष्यन्तेऽत्र ज्यन्ते दुःखान्यत्रेति वा कर्मभिरपवृज्यन्तेऽत्रापवर्गः॥ शेषश्चात्र॥

एकादश

महोदयस्सर्वदुःखक्षयो निर्व्याणमक्षरं॥ मुक्तिर्मोक्षोऽपवर्गोऽथ मुमुक्षुः
श्रमणो यतिः॥१५॥

निर्वेशोऽस्यास्तीति भावः॥ शान्तिर्नैश्चिन्त्यमस्तिकः॥ मोक्तुमिच्छुर्मुमुक्षुः॥ सन्भिक्षाशंसेरुरिति उः॥ श्राम्यति तपसेति श्र
मणः॥ श्रवणोऽपि॥ नन्द्यादित्वादनः॥ यतते मोक्षायेति यतिः॥ यदिपठीत्यादिना इः॥ यच्छत्युपरमति सर्वसंगेभ्य इति वा॥१५॥

वाचंयच्छतिनियमतिवाचंयमः॥ वाचंयमोव्रतइतिसाधुः॥ यतंयमनमस्यास्ययती॥ उत्तमक्षमादिभिर्गुणविशेषैर्भा
वितात्मा॥ साध्नोतिसाधुः॥ सम्यग्दर्शनादिभिःपरमंपदंसाधयतीतिवा॥ कृवापाजिस्वदिसाध्यशूभ्यउण्॥ नास्त्य
गारमस्यअनगारः॥ ऋषतिजानातित्वमृषिः॥ नाम्युपान्त्येतिकिः॥ दर्शनाद्वाऋषिः॥ पद्मादृतेनः ऋषिविष्णु

मुनिधनानामेकैकंत्रीणि

वाचंयमोव[illegible]तीसाधुरनगारंऋषिर्मुनिः॥ निर्ग्रन्थोभिक्षुरस्यांस्वंतपोयोगशमा
दयः॥२॥७६॥

किलदर्शनादिति॥ मन्यतेऽसौमुनिः॥ मनेरुदेनौच्चस्यवेतिइः॥ पुंस्त्रीलिङ्गः॥ ग्रन्थाद्द्रव्यान्निष्क्रान्तोनिर्ग्रन्थः॥ भिक्षुण
शीलोभिक्षुः॥ भिनत्तिक्षुधमष्टप्रकारंकर्मेतिवा॥ अस्यमुमुक्षोस्तपोयोगशमादयोधनम्॥ आदिशब्दात्क्षान्त्या
दयः॥ ततस्तपोधनः॥ योगीशमवान्॥ क्षान्तिमानित्यादीनियौगिकानिनामानिभवन्तीति॥७६॥

मोक्षस्योपायः कारणं मुमुक्षुभिर्युज्यते योगः॥ ज्ञानं यथावस्थिततत्त्वावबोधः॥ श्रद्धानं सम्यक्तत्त्वे रुचिः॥ चर
णं चारित्रं सावद्ययोगत्यागः तानि आत्मा स्वरूपं यस्य स तथा॥ न भाष्यते अभाषणम्॥ मुनेः कर्म मौनम्॥ पुंक्ली
बलिङ्गः॥ घञ्वीवर्णाद्वा घ्यादेरित्यण्॥ गृणाति धर्मं गुरुः॥ कृग्रृरत उर्वेति उः॥ धर्मस्योपदेष्टा धर्मोपदेशकः
निषेकादिकरो गुरुरित्यन्ये॥७१॥ अनुयोगं व्याख्यां करोति अनुयोगकृत्॥ आचार्यते सेव्यते इत्याचार्यः॥ आचा

मोक्षोपायानामेकैकं चत्वारि

द्वे

मोक्षोपायो योगो ज्ञानं श्रद्धानं चरणात्मकः॥ अभाषणं पुनर्मौनं[2] गुरुर्द्धर्मोपदेशकः[2]॥७१
अनुयोगकृदाचार्य[2] उपाध्यायस्तु पाठकः॥ अनूचानः प्रवचने साङ्गेऽधीती गणि[2]श्च सः

रे साधुरिति वा॥ आचारं ग्राहयतीति नैरुक्ताः॥ मन्त्रव्याख्याकृदाचार्य इत्यन्ये॥ उपेत्याधीयतेऽस्मादित्युपाध्यायः॥
इङो ध्यादाने तु टिद्वेति घञ्॥ पाठयतीति पाठकः॥ अध्यापकः॥ अनुवाच्येत्यनूचानः॥ वेयिवदनाश्वदनूचानमि
ति कानेः साधुः॥ प्रोच्यते प्रवचनमागमस्तत्र साङ्गे इति आचाराद्यङ्गयुक्ते॥ अधीतमनेनाधीती॥ इष्टादेरि तीनि व्या
प्येकेन नि कर्मण्यसप्तमी॥ गणपतेः पूज्यते इति गणी॥ स्वरेभ्य इरिति इः॥७२॥

हे०टी
२३

शासनीयः शिष्यः॥ इणस्तुजुषेति शास इति क्यपि इत्वासः॥ शास इति सादेशः॥ विनीयते विनेयः॥ यस्य आत इति यः॥ गु
रोरन्ते वसत्यवश्यमित्यन्तेवासी॥ शयवासिवासेष्वकालादिति सप्तम्या अलुक्॥ शैक्षश्छात्त्रः॥ शिष्ये छात्त्रः॥ शिक्षाशी
लमस्य शैक्षः॥ छत्रादिस्याघत्रादेरजित्यण्॥ शिक्षायां भव इति वा॥ शिक्षादेश्चाण्॥ प्रथमकल्प आरम्भः प्रयोजन

शिष्यो विनेयोऽन्तेवासी शैक्षः प्राथमकल्पिकः॥ सतीर्थ्यास्त्वेकगुरवो विवेकः पृथगात्मता॥१८॥

मस्य प्राथमकल्पिकः॥ प्रथमकल्पमधीत इति वा॥ पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकादि तीकण्॥ तरन्त्यने
न विद्याम्भोनिधिमिति तीर्थम् गुरुः॥ समाने तीर्थे वसन्ति सतीर्थ्याः॥ सतीर्थ्य इति यान्तो निपात्यते॥ एकस्समा
नो गुरुरेषामेकगुरवः॥ विवेचनं हेयोपादेयज्ञानं विवेकः॥ अविवेकात्पृथग्भिन्न आत्मा पृथगात्मा तद्भावः पृथगात्मता॥१८

शिव
२३

तुल्यागमास्तुल्यव्रतास्तुल्याचाराश्च अन्योन्यं समाने ब्रह्मण्यागमे गुरुकुले वा व्रतं चरन्तीत्येवंशीलाः सब्रह्मचारिणः ॥ स
माना ब्रह्मचारिण इति सब्रह्मचारीणि निपात्यते ॥ परम्परया गुरुशिष्यप्रशिष्यादिसन्तानरूपायाभावः ॥ पारम्पर्य्येम् ॥
आम्नायते आम्नायः ॥ सम्यक् प्रदीयते संप्रदायः ॥ गुरोः क्रमः ॥ गुरुक्रमः ॥ ८० ॥ व्रतं शास्त्रविहितो नियमस्तस्यादानं व्र
तादानम् ॥ परिव्रजनं परिव्रज्या ॥ प्रव्रज्यापि ॥ अस्यटिव्रजियजः क्यविति क्यप् ॥ तपसः करणं तपस्या ॥ तपसः कर्मनिति क्यनि

एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ स्यात्पारम्पर्यमाम्नायः संप्रदायो गुरुक्रमः ॥ ८
व्रतादानं परिव्रज्या तपस्या नियमस्थितिः ॥ अहिंसा सूनृतास्तेयब्रह्माकिञ्चनता यमाः ॥ ९

शंसि प्रत्ययादिति अः ॥ नियमे व्रते अवस्थानं नियमस्थितिः ॥ हिंसा प्राणव्यपरोपणं तदभावोऽहिंसा ॥ सूनृतं प्रियं सत्यं
वचः ॥ स्तेयमदत्तादानं तदभावोऽस्तेयम् ॥ ब्रह्मेति ब्रह्मचर्यं ॥ मैथुनत्यागः ॥ अकिञ्चनता परिग्रहत्यागः ॥ यम्यते चित्त
मेभिरिति यमाः ॥ ९१॥०॥

निमम्यन्तेचित्तमेभिरितिनियमाः॥शुचेर्भावःकर्मवाशौचंकायमनसोःशुद्धिः॥सन्तोषस्सन्निहितसाधनादधिकस्यानु
पादित्सा॥स्वकीयमध्ययनंस्वाध्यायो मोक्षशास्त्राध्ययनं प्रणवजपो वा॥तप्यतेनेनेतितपः चान्द्रायणादि॥देव
तायावीतरागस्यप्रणिधानमात्मनासर्वतःसम्भेदः॥क्रियन्तेमनोवश्यमनेनकरणम्॥आस्यतेऽनेनेत्यासनम् प

पञ्च
नियमाश्शौचंसन्तोषौ स्वाध्यायंतपसी अपि॥देवताप्रणिधानंत्र्यं करणंपुनरासनं॥
८२॥प्राणायामः प्राणयमाश्श्वासप्रश्वाससंरोधनं॥प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यस्समा
हृतिः॥८३॥

मासनादि॥८२॥प्राणस्यायमनंप्राणायामः॥प्राणस्ययमनंप्राणयमः॥सन्यासेनेवाह्यस्यवायोराचमनंश्वासः॥
कोष्ठस्यवायोर्निःश्वासनंप्रश्वासः॥तयोरोधनंगतिच्छेदः॥प्रतीपमाहरणंविषयेभ्यइन्द्रियाणांप्रत्याहारः॥८३॥

धारणंधारणा॥ क्वचिदिग्देवतादौ ध्यानध्येये चित्तस्य स्थिरोबन्धः स्थैर्यमितियावत्॥ ध्यायते ध्यानं विषये
तस्मिन्निति देवतादौ ध्येये एकप्रत्ययान्तरेणापरामृष्टा प्रत्ययस्य ध्येयालम्बनस्य सन्ततिः॥ सदृशप्रवा

धारणांतु क्वचिद्ध्येये चित्तस्य स्थिरबन्धनं॥ ध्यानंतु विषये तस्मिन्नेकप्रत्ययसन्ततिः
॥८४॥ समाधिंस्तु तदेवार्थमात्राभासनरूपकं॥ एवं योगो यमाद्यङ्कैरष्टभिस्समतोऽ
ष्टधा॥८५॥०॥

हरति॥८४॥ सम्यगाधीयन्ते समाधिः॥ तदेव ध्यानमेवार्थमात्राभासनरूपध्येयाकारनिर्भासात्मकं ध्येयस्व
भावावेशात्॥ उपसंहारमाहैवमिति॥ स्पष्टम्॥८५॥०॥

शोभनं श्रेयः श्वःश्रेयसम्॥ श्वःप्रागमि श्रेयो वा॥ निसश्वश्श्रेयसं इत्यन्तसमासान्तः॥ शोभते शुभम्॥ शेतेऽशुभमनेन
शिवम्॥ कल्यते धार्यते कल्याणम्॥ कल्याणपर्योणादय इत्याणन्तो निपात्यते॥ कल्यं नीत्यज्ञत्वमणतीति वा॥ व
सुमत्स्थाद्वादीयसौ मतोरन्यस्वरादेश्च लोपे वसीयः॥ शोभनं वसीयः श्वोवसीयसम्॥ श्वःप्रागमि वसीयो वा
श्वसो वसीयस इत्यन्तसमासान्तः॥ अतिशयेन प्रशस्यं श्रेयः॥ क्षीयते क्लेशोऽनेन क्षेमम्॥ पुंक्लीबलिङ्गः॥ अश्नोरीति

बोऽशकुशलस्य १

श्वःश्रेयसं शुभं शिवं कल्याणं श्वोवसीयसं श्रेयः॥ क्षेमं भावुकं भविकं कुशलं मङ्गलं भद्रं मद्रं शस्तानि
इत्याचार्यहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां देवाधिदेवकाण्डः प्रथमः॥१॥

मः॥ भवनशीलं भावुकम्॥ भुवोऽस्त्यस्य भविकम्॥ कुशं पातिपुण्यात्मना सम्बध्यते कुशलम्॥ लपिवपिकुपिकुशिभ्य
लुक्॥ कुशं लातीति वा॥ मंग्यते सेव्यते मङ्गलम्॥ मदिकन्द्यात्यलः॥ भन्द्यते भद्रम्॥ भन्देर्वेति रेन लुक्॥ भन्द्रमपि॥ मा
द्यति हृष्यत्यनेन मद्रम्॥ मीवृधीति रः॥ शस्यते स्तूयते इति शस्तम् प्रशस्तमपि॥ शेव श्वात्रौ॥ भद्रं भव्यं काम्यं स्सुकृतसू
न्तो॥ इत्याचार्यहेमचन्द्रविरचितायां स्वोपज्ञाभिधानचिन्तामणिनाममालाटीकायां देवाधिदेवकाण्डः प्रथमः॥१॥

अथ द्वितीयं देवकाण्डं व्याख्यायते॥ तत्र देवानामाश्रयः स्वर्ग इति प्रथमं स्वर्गनामान्युच्यन्ते॥ स्वर्यते सुखहेतुतया कथ्यत इति स्वर्गः॥ गम्यमिति गमीति गः॥ सुष्ठु अर्ज्यत इति वा॥ भावयात्रोर्घञ्॥ तृतीयं विष्टपम्॥ भूर्भुवः स्वरिति श्रुतेः॥ अत्र मयूरव्यंसकादित्वात्समासे पूरणप्रत्ययलोपः॥ त्रिविष्टपमिति प्राञ्चः॥ ते हि प्रायेण पवोश सोच्चयात्पयेन पठन्ति॥ द्युकृमिमन्ये द्यौरिति अभिगच्छतीत्यमूं सुरजन इति द्युगमिभ्यां डोरिति डोप्रत्यये॥ द्योशब्द ओकारान्तः दीव्यन्त्यस्यां देवा इति॥ देवेर्डिविति डिवप्रत्यये॥ दिवशब्दो वन्तः॥ द्वयोरपि सो द्यौः॥ स्त्रीलिङ्गः॥ भवत्यस्यां सुखमिति॥ भूसूभ्यः किदिति रस्रप्रत्यये भुविः॥

देवानां सप्तविंशतिः

स्वर्गस्त्रिविष्टपं द्यौर्दिवौ भुविस्तविषताविषौ नाकः॥ गौस्त्रिदिवं मूर्द्धलोकः सुरालयस्तास्सदस्त्वमराः॥१॥०॥

स्त्रीलिङ्गः॥ यद्वा च स्वरिति॥ त्रिविष्टपं देवलोको भुविः स्त्री द्यौर्दिवौ स्त्रियौ॥ तवगतौ विति सोत्रो धातुः॥ तप्यते शुभकर्मवशात् अस्मिन्निति॥ तवेषैति वाकित्ति द्रुषे विषः॥ ताविषः॥ नास्मिन्नकं दुःखमस्तीति नाकः॥ पुंक्लीबलिङ्गः॥ नाखादित्वात् अपन्स्वरस्य इत्यभवति॥ नभ्राकम्यते अभिलष्यते नास्तिके रिति तत्रः कमिगमीति डित्यप्रत्यये वा नाकः॥ गच्छन्त्याश्रयन्ति देवास्तामिति द्युगमिभ्यां डोरिति डोप्रत्यये गौः॥ स्त्रीपुंसाडलिङ्गः॥ तृतीयं दिवं लोकः त्रिदिवं॥ पुंक्लीबलिङ्गः॥ मयूरव्यंसकादित्वात्समासस्तीयलोपश्च अत्र द्वीप्यन्त्यस्मिन्निति घञर्थे स्यादिभ्यः क इति कप्रत्यये दिवमिति सिद्धम्॥ ऊर्द्ध्वस्थासो लोकश्च ऊर्द्धलोकः॥ सुराणामालयश्चावासः सुरालयः॥ अस्यापि यौगिकत्वात्॥ सुरशावास देवलोकप्रभृतयोप्युह्यन्ते॥ शेषश्चात्र॥ फलोदयो मेरुपृष्ठं वासवः वासवे रिक्तौ दिदिविदृश्शे दिविद्युश्चाद्दिवं च स्वर्गवाचकाः॥ स्वरव्ययं सुखप्यते॥ अथ देवनामानि तत्र सद इति॥ नच्छदेन स्वर्गः पदमस्यते॥ तत्र सीदन्तीति तत्सदः॥ स्वर्गसदः॥ द्विविति द्विपाद्यौगिकत्वात्॥ द्युसद्मानस्यादयः॥ न म्रियन्त इत्यमराः॥ अमरशब्दस्त्रिरस्या

दीव्यन्ति क्रीडन्तीति देवाः॥ लिहादिभ्य इत्यच्॥ शोभनं पर्व चरितमुत्सवो वा येषां ते सुपर्वाणः॥ सुरत ऐश्वर्य्ये दीप्तौ॥ सुरन्तीति सुराः

हे०टी० ॥ नाम्युपान्त्येति कः॥ सुन्वन्तीति वा॥ ऋतकं ज्योतिर्वन्तीत्यादिना किन्रः॥ सुष्ठु राजन्त इति वा॥ क्वचिदिति डः॥ सुरा पानमस्तीति वा॥ अभ्र

२६ ध्वादिभ्य इत्यप्रत्ययः॥ यतोऽब्धिजा सुरा तैः पीतेति प्रसिद्धिः॥ निष्क्रान्ता जराया निर्जराः॥ सदा यौवनत्वात्तेषाम्॥ देवा एव देवताः॥

स्त्रीलिङ्गः॥ देवात्तलिति तल्॥ रमन्ते पुण्यकार्य्येषु ऋतुस्ते भवन्तीति ऋभवः॥ रभि प्रथिभ्यामृच्च रस्येति उप्रत्ययः॥ रस्य च ऋः॥

ऋतशब्दोऽदितिवाची ततो भवन्तीति वा॥ केवयुभुरण्यादिति डुः॥ बर्हिरग्निर्मुखमेषां बर्हिर्मुखाः॥ न निमिषन्तीत्यनिमिषाः॥

देवता एवं दैवताः॥ पुंस्त्रीवल्लिङ्गः॥ प्रज्ञादिभ्योऽणित्यण्॥ नाकः स्वर्गो विद्यते येषां ते नाकिनः॥ यौगिकत्वात्॥ स्वर्गिणः॥

त्रिदिवाधीशा इत्यादयोऽपि॥ लिख्यन्ते चित्रादौ ध्यानार्थमिति लेखाः॥ हस्तादौ प्रशस्ता लेखाः सन्त्येषामिति वा॥ अभ्रादि

त्वादः॥ प्रशस्तं वृन्दमस्त्येषां वृन्दारकाः॥ वृन्दादारक इत्यारकः॥ शोभनं मनो येषां ते सुमनसः॥ सङ्कल्पमात्रेण लब्धसि

द्धित्वात्॥ मलिनसङ्कल्पाभावाद्वा॥ सुष्ठु मान्यन्त इति वा॥ विहायस्सु मनसि न्यस्तान्तोऽनिपात्यते॥ त्रिदशास्त्रिदशाः॥ प्रमाणेसं

ख्यात् इति डः॥ त्रिंशद्देवा देवतास्त्रयस्त्रिंशद्देवताः त्रिंशद्वसुरुद्रविरादिति श्रुतेः॥ तिस्रो दशा वयोवस्था येषां ते त्रिदशाः त्रिशब्दषोः

मनुष्यवत्त्वात्॥ त्रिदशा इव त्रिदशा इति वा॥ न म्रियन्त इत्यमर्त्याः॥ मृसीपसिवस्यतिभ्यस्तादिरिति नकारादिर्यप्रत्ययः॥

म्रियन्त इति मर्त्ताः॥ लूम्नावेति तप्रत्ययः॥ मर्त्ता एव मर्त्याः॥ मर्त्तादिभ्यो य इति स्वार्थे यः॥ न मर्त्याः अमर्त्या इति वा॥ स्वाहा

स्वधा क्रतुसुधाभुज इति भुक्शब्दः स्वाहादीनां प्रत्येकं संबध्यते॥ तेन स्वाहाभुजः॥ स्वधाभुजः॥ क्रतुभुजः॥ सुधाभु

जश्च॥ स्वाहाभुञ्जत इत्यादि कृत्वा एषां यौगिकत्वात्स्वाहाशनाः॥ स्वधाशनाः॥ यज्ञाशनाः॥ अमृतान्धसः॥ इत्यादयोऽपि॥

ऽग्न्यूढ इत्येयरर॥ यौगिकत्वादादित्याः॥ अदितिजा इत्यादयोपि॥ श॥ गीर्वाणो स्वर्ये सांगीर्वोरगाः॥ स्विय
ने पुण्यकृद्याज्ञवन्त इति मरुतः॥ मृत उदित उत॥ नास्ति स्वप्नो निद्रा येषां ते॥ अस्वप्नाः॥ विबुध्यन्ते ज्ञानं न्म
ऽवधि नेति विबुधाः॥ दानवानामरयो दानवारयः॥ यौगिकत्वात् दनुजद्विष इत्यादयः॥ शेषश्चात्र॥ निलिम्पाः॥ का
मरूपांश्च साध्याः शोभांश्चिरायुषः पूजिताः मन्यमहिताः सुचाला वायुनाः सुराः॥ तथा द्वादशार्का वसवो छेदावि
श्वेदेवास्त्रयोदश॥ षट्त्रिंशत्तुषिताश्चैव षष्टि रभाः सुराश्च पि॥ षट्त्रिंशदधिके महाराजिकाश्च शते उभे॥ रुद्रा ए
कादशैकोनपंचाशद्वायवोपि च॥ चतुर्दश तु वैकुंठाः॥ सुशर्माणः पुनर्दश साध्याश्च द्वादशेत्याद्या विज्ञेया गणदेवताः॥ ते

देवास्तु पर्वे सुरनिर्जरदेवतर्भुर्वर्हिर्मुखानिमिषदैवतनाकिलेखाः॥ वृन्दारकाः स्सुमनसस्त्रि
दशा अमर्त्याः स्वाहास्वधाक्रतुसुधाभुज आ आदितेयाः॥ श॥

यं देवानां यानं वाहनं देवयानं॥ सुरयानमित्यादि॥ विमानि वर्त्तन्तेऽस्मिन्देवा इति विमानः॥ पुंक्लीबलिंगः॥ व्योम्नि या
न्यानेन व्योमयानमिति तेषां विमानं यानमिति सम्बन्धात् विमानयाना वैमानिका इत्यादीनि यौगिकानि देवानां नामानि

हे॰टी॰ तेयानि तेषां देवानामन्धोऽन्नं भोज्यमाहार इति यावत्॥ देवान्धो देवान्नं देवभोज्यं देवाहार इत्यादि॥ पीयिः सौत्रो धातुः पी
२७ यते इति पीयूषम्॥ खलि फलीत्यूषः॥ पेयूषमिमित्यपि॥ नास्ति मृतमनेनेत्यमृतम्॥ सुष्ठु धीयते पीयते इति सुधा॥ उप
सर्गो दान इत्यपि॥ समुद्रनवनीतमपि॥ देवाश्च जैनसमये भवनपतिव्यंतरज्योतिष्कवैमानिकाभेदाच्चतुर्द्धा भवन्ति॥ ३॥ त
त्र भवनपतीनाह॥ दशेति दशसंख्याः असुरादयः रत्नप्रभायाः मध्ये भवन्ति भवनानि आवासास्तेषामधीशाः कुमारा

गीर्वाणा मरुतोऽस्वप्ना विबुधा दानवारयः॥ तेषां यानं विमानोऽन्धः पीयूषममृतं सुधा
॥ ३॥ असुरा नागास्तडितः सुपर्णकाः वह्नयोऽनिलाः स्तनिताः॥ उदधिद्वीपदिशो दशभव
नाधीशाः कुमारान्ताः॥ ७४॥

१ न्ताः कुमारशब्दान्ताः॥ तेन असुरकुमाराः॥ १॥ नागकुमाराः॥ २॥ तडित्कुमाराः॥ ३॥ सुपर्णकुमाराः॥ ४॥ वह्निकुमाराः॥ ५॥
अनिलकुमाराः॥ ६॥ स्तनितकुमाराः॥ ७॥ उदधिकुमाराः॥ ८॥ द्वीपकुमाराः॥ ९॥ दिक्कुमाराः॥ १०॥ इत्युच्यन्ते॥ कुमारवदे
तेकान्तदर्शनाः सुकुमारा मृदुमधुरललितगतयः शृंगाराभिजातरूपविक्रियाः कुमारवच्चोद्धतवेषभाषाभरणप्रहरण
वरणयानवाहनाः कुमारवच्चोल्वणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते॥ ४॥

अथव्यन्तराणामाह॥ पिशाचादयोऽष्टौ विविधेषु शैलकन्दरान्तरवनविवरादिषु प्रतिवसन्तीति व्यन्तराः॥ वनानां समूहो वानं तस्यान्तरे भवन्तीति पृषोदरादित्वाद्वानमन्तरा इत्यपि॥५॥ अथ ज्योतिष्कानाह॥ द्योतन्त इति ज्योतींषि विमानानि तान्यावसतया सन्त्येषां ज्योतिष्काः॥ ब्राह्मादिभ्यस्त्वादि नीकप्रत्ययः॥ भास्वरशरीरत्वात्समस्तदिग्मण्डलद्योतनाज्ज्योतींषि देवाः ज्योतींष्येव वा ज्योतिष्का॥ पंचेति पंचसंख्याः॥ पंचविधा इत्यर्थः॥ ततस्तु वैमानिकानाह॥ विमानेषु भवा वैमानिकाः॥ अथ ध्यात्मादित्वादिकण्॥ ते च द्विधाः कल्पेभवाः कल्पातीताश्च इन्द्रादिदेशनया कल्पनात्कल्पाः

देवयोनीनामेकैकं दश॥१

स्युः पिशाचाभूतायक्षाराक्षसाः किन्नराः अपि॥ किंपुरुषामहोरगागन्धर्वाव्यन्तराअमी॥५

ज्योतिष्कानामेकैकं पंच॥२

ज्योतिष्काः पञ्च चन्द्रार्कग्रहनक्षत्रतारकाः॥ वैमानिकाः पुनः कल्पभवाद्वादशते त्वमी॥६॥ वैमानिकादीनामेकैकं द्वादश॥३

सौधर्मैशानसनत्कुमारमाहेन्द्रब्रह्मलान्तकजाः॥ शुक्रसहस्रारानतप्राणतजाआरणाच्युतजाः॥७

समुदायसन्निवेशे विमानमात्र प्रस्तारस्तत्र भावः कल्पभवा द्वादशते पुनरमी॥६॥ सुधर्मा देवसभा सास्मिन्नस्तीति सौधर्मः कल्पस्तद्वास्त्यस्येत्यण्॥ तत्र जाताः सौधर्मजाः॥ ईशानस्येन्द्रस्य निवास ऐशानः कल्पस्तत्र जातास्तु ऐशानजाः॥ एवं सनत्कुमारादिकल्पेषु जाताः सनत्कुमारजाः॥ माहेन्द्रजाः॥ ब्रह्मा ब्रह्मलोकोऽभिधीयते॥ भीमो भीमसेन इति न्यायादिति ब्रह्मजाः॥ लान्तकजाः॥ महाशुक्रजाः॥ सहस्रारजाः॥ आनतजाः॥ प्राणतजाः॥ आरणजाः॥ अच्युतजाः॥ अत्रार्यापादान्त्यप्राक्षरयोः पूर्वौद्रुतौ रूढिसंयोगवर्जनाल्लघुरूपं भवतः॥७॥

हे॰टी॰
२८

कल्पानतीताः कल्पातीताः॥कल्पान्त्रिक्रम्योपरिस्थिता इत्यर्थः॥नवसंख्यानवलोकपुरुषस्यग्रीवादिप्रदेशविनिविष्टा
ग्रीवाभरणभूताग्रैवेयकाः कुलकुद्धिग्रीवान्त्रषास्यलंकार इत्येयकञ् पञ्चान्विति पंचसंख्याः नविद्यन्ते उत्तरोयेभ्यस्तेऽ
नुत्तराः विजयवैजयंतजयंतापराजितासर्वार्थसिद्धिनामानः॥उपसंहारमाह॥एवमुक्तप्रकारेणदेवाभवनपत्यादय
श्चतुर्विधाः॥निकायभेदात्निकायोनिवासउत्पादस्थानं तद्भेदात्॥तथाहि॥भवनपतयोऽशीतिसहस्राधिकयोजनलक्ष
पिंडायांरत्नप्रभायामूर्द्धमधश्चयोजनसहस्रमेकैकमपहायजन्मासादयन्ति॥व्यन्तरास्तस्या एवोपरि यत्परित्यक्तं॥योजन

कल्पातीतानवग्रैवेयकाः पञ्चत्वनुत्तराः॥निकायभेदादेवंस्युर्देवाः किलचतुर्विधाः॥८॥

सहस्रंतस्याधऊर्द्ध्वं चयोजनशतमेकैकमपहायमध्येऽष्टसुयोजनशतेषुजन्मप्रतिलभन्ते॥ज्योतिष्कास्तुसमभूतला
द्भूभागात्सप्तशतानि नवत्याधिकानियोजनानामारुह्यदेशेत्तरयोजनशतपिंडेनभोदेशेलोकांतात्किंचिन्न्यूनेजन्मग्र
गृह्णन्ति वैमानिकास्तुमध्यलोकमधिरुह्यामुतःसौधर्मादिषुकल्पेषुसर्वार्थसिद्धिविमानपर्यवसानेषूत्पद्यन्ते तदे
वमुत्पादंनिवासभेदाच्चतुर्विधादेवाःस्वधामसत्त्वनाः भवनपत्यादयोन्यत्रापिलवणजलधिमंदरवर्षधरादिद्रुमगहन
प्रभृतिषुवसंति उक्तस्थानव्यतिरेकेणान्यत्रैषामुत्पादोजन्मनास्तीतिनिवासार्थःसंग्रहार्थोवानिकायशब्दः॥८॥

अथ देवविशेषनामान्याह॥ अदितेरपत्यं लोकरूप्यात् आदित्यः॥ अनिदमीत्यादिनाण्यः॥ सूते प्रकाशं सविता॥ अपरीनामयति
अर्यमा॥ अर्यमाजरिश्वन्नित्यादिना ऽनजोनिपात्यते॥ खराः सहस्रमुष्णा अंशवो यस्य स खरसहस्रोष्णांशुः॥ खरांशुः॥ सहस्रांशुः
उष्णांशुः॥ यौगिकत्वात् खररश्मिः॥ दशशतरश्मिः॥ शीतेतररश्मिः॥ इत्यादयोऽपि॥ अश्नुते व्याप्नोति द्यामंशुः॥ अपरोऽरण
न्नोति गच्छति उन्नोति गच्छ॥ सूयते स्तूयते रविः॥ स्वरेभ्य इति इः॥ मतंडस्यापत्यं मार्तण्डः॥ ऋषीत्यादिना अपरस्यानरल्यते
नलमः इति नरश्मिः॥ पुंस्त्रीलिंगः॥ ऋहस्व इत्यादिना अप्रशिः॥ गच्छते अभिकांक्ष्यते लोके रसान् विति गभस्तिः॥ गच्छे गभ
भवेत्यस्तिकृ॥ गच्छे गभो देशश्च आगं चभस्तिदीपयतीति वा॥ पृषोदरादित्वात्॥ अरुणसारथिरस्यास्तीति अरुणः॥ अ
भादित्वाद प्रत्ययः॥ अरुण एव वर्णत्वाद्वा अरुणः॥ भातीति भानुः॥ दाभाभ्यां नुरिति नुः॥ नभोगृहो मणिर्नभोमणिः॥ मणि
शब्दः प्रत्येकसंबध्यते॥ तेन नभोमणिः॥ अहर्मणिः॥ यौगिकत्वात् व्योमरत्नं॥ दिनरत्नमित्यादि॥ सुरति सुवति वा॥ क
मैसु॥ लोकानिति सूर्यः॥ कुप्यभिद्येत्यादिना क्यन्निपातः॥ सूर एव वा सूर्यः॥ मर्त्तोदित्वाद्यः॥ अर्च्यते स्तूयते इत्यर्कः॥ अ
च्यते इति वा भीरणालोति कः॥ किरजित मांसीति किरणः॥ कृगृदृलपिविधिभ्यः कि दित्यणः॥ भज्यते आश्रीयते अनेन कृत्वा
लोके एलोक इति भगः॥ गोचरसंचरसंचरेत्यादिना घप्रत्ययः॥ महान्पुष्मातीति महपुषः॥ मूलविभुजादप इति कः॥ आ
दित्यैर्हि सुषुम्नाभिर्नोडीभिर्महान्पुष्मातीति॥ पद्मादिः॥ सुषुम्ना द्याश्च नाड्योऽस्य पुष्मन्ति सततं महान् पूषन्निति वर्द्धते ऋतु
भेदाद् रश्मिभिरिति उक्तिनड्वीत्यादिना अनि पुषा॥ पद्मादिः॥ ऋतुभेदात्पुनस्तस्यातिरिच्यन्ते रचरश्मयः॥ शतानि द्वादशम

हं॰टी॰ २८ धौत्रयोदशैवं माघे वै चतुर्दश पुनर्ज्येष्ठे नभोनभस्ययोस्तथा॥ पंचदशैव त्वाषाढे षोडशैव तथाश्विने॥ कार्त्तिके
त्वेकादशशतान्येवं तपस्यपि मार्गे तु दश सार्द्धानि शतान्येवं च फाल्गुने पौष एव परं मासि सहस्रं किरणा रवेः॥
पतति गच्छति व्योम्नीति पतङ्गः॥ पततिमीत्यादिनाऽङ्गच्॥ पतन्सन्गच्छतीति वा॥ नाम्नो गमः॥ खड्डुचेत्यानि

एकसप्ततिः १

ऽश्वादित्यस्सविताऽर्यमा खरांशुस्सहस्रांशुः शूरो रविर्मार्त्तण्डस्तरणिर्ज्योतिर्भस्तिर्हरणिर्भानु
र्नभोऽहस्करिः॥ सूर्योऽर्कः किरणो भजोंऽशुमान् पूषा पतङ्गः खगो मार्त्तण्डो यमुनाकृतान्त
जनकः प्रद्योतनस्तापनः॥२८॥

दिनाखड्॥ खेगच्छतीति डः॥ खगः॥ मृतमण्डमस्येति मृतार्ण्डः॥ मृतमंडमजायतेति॥ रैतस्यापत्यमृष्यरिणः॥ मार्त्तोण्डः॥
यमुनायाः कृतान्तस्य जनकः यमुनाजनकः॥ कृतान्तजनकः॥ यौगिकत्वात्कालिन्दीसूरित्यादयोऽपि॥ प्रद्योतते प्रद्यो
तनः॥ तापयतीति तापनः॥ नन्द्यादित्वाद्ल्युः॥२८॥

ब्रध्नाति तेजसा दृष्टीरिति ब्रध्नः॥ दिननगेत्यादिना निपातः॥ हन्ति तमो हंसः॥ मावावद्यमीत्यादिना सः॥ चित्रा नानाप्र
कारा भानवो यस्य स चित्रभानुः॥ विवस्तेजोऽस्यास्तीति विवस्वान्॥ सूते तेज इति सूरः॥ ऋट्रञ्पजोन्यादिना रक्॥ तालव्या
दिरित्यन्ये॥ त्वषति दीप्यते त्वष्टा॥ त्वष्टृक्षत्तृदुहित्रादय इति निपातनात्॥ द्वादशात्मानो रूपाण्यस्य द्वादशात्मा॥
द्वादशात्मादित्या इति रूढिः॥ हेलयति क्रोधयति ग्रस्नूनिति हेलिः॥ स्वरेभ्य इरिति इः॥ मेद्यति मित्रः॥ चिमिदिशंसि
भ्यः क्तिदिति त्रः॥ ध्वान्तस्यारातिः ध्वान्तारातिः॥ यौगिकत्वात्तिमिरारिरित्यादयः॥ अब्जानि प्रशस्यश्च हस्ते यस्य स

ब्रध्नो हंसश्चित्रभानुर्विवस्वान्सूरस्त्वष्टा द्वादशात्मा च हेलिः॥ मित्रो ध्वान्तारातिरब्जांऽशु
हस्तश्चक्राब्जाहर्बान्धवस्सप्तसप्तिः॥१०॥

नयाऽब्जहस्तः॥ अंशुहस्तः॥ यौगिकत्वात्पद्मपाणिः॥ गभस्तिपाणिरित्यादयः॥ चक्रस्याब्जस्याह्नश्च बान्धवः॥ चक्रबा
न्धवः॥ अब्जबान्धवः॥ अहर्बान्धवः॥ यौगिकत्वाच्चक्रवाकबन्धुः॥ पद्मबन्धुर्दिनबन्धुरित्यादयः॥ सप्तसंख्यास्सप्तयोऽश्
श्वाः यस्य स सप्तसप्तिः॥ यद्वेदे॥ सप्त युञ्जन्ति रथमेकचक्रं॥ एकोऽश्वो वहति सप्तनामा॥१०॥

हे०टी०
३०

दिवादिभ्यःसप्तभ्यःशब्देभ्यःकरशब्दःतेनदिवाकरः॥यौगिकत्वाद्दिषमाख्यइत्यादयः॥सप्तभिर्नामभिरूपलक्षितो
ऽस्योपस्येतिवासप्तसप्तिः॥दिनकरः॥अहस्करः॥दिवसकरः॥प्रभाकरः॥विभाकरः॥भास्करः॥दिवाकरेणेत्यादि
मुत्पन्नोसंख्याहोदिवेत्यादिनाटः॥यौगिकत्वाद्वासरकृद्दिनप्रणीर्दिनकृदित्यादयः॥मेहतिसिंचतिमिहिरः॥म्रुषी
षीत्यादिनाइरक्॥आदित्याज्जायतेवृष्टिरितिहिस्मृतिः॥विरोचतेइतिविरोचनः॥ग्रहाणामब्जिनीनांगवांद्यू
नांचपतिः॥ग्रहपतिः॥अब्जिनीपतिः॥गोपतिः॥द्युपतिः॥यौगिकत्वात्॥ग्रहेशः॥पद्मिनीशः॥त्विषामीशः

दिवादिनाहर्दिवसप्रभाभासःकरःस्यान्मिहिरोविरोचनः॥ग्रहाब्जिनीगोद्युपतिर्विकर्तनो
हरिःशुचीनौगगनध्वजाध्वगौ॥०११॥

दिनेशइत्यादयोपि॥विकृन्तत्यात्मानंविविधंकर्तनमस्येतिवाविकर्तनः॥चक्रभ्रमेणास्यतेजःशातनात्॥हरतितमां
सीतिहरिः॥स्वरेभ्यइरितिइः॥शोचत्यस्मिन्नुलूकइतिशुचिः॥नाम्युपान्त्यत्वादिकिन्॥इनेतिइनः॥जीणशीदीबुध्य
विसिभ्यःकिदितिनः॥गगनशब्दात्ध्वजशब्दोऽध्वगशब्दश्चगगनाध्वगः॥यौगिकत्वात्नभःकेतनःनभःपान्थइत्या



शिव
३०